Begins on fol. 47*a*. The other works herein are **Mēghamālāmañjarī** 1*a*, **Ariṣṭanavanīta** 27*a*, **Ariṣṭalakṣaṇa** 40*a*.

Incomplete. Contains the following topics :—Varṣacakra, Dōṣāpavāda-prayāṇādikālanirṇaya, Strījātaka, Śakunādi, Svapnādhyāya, Gaulī-patanaphala.

Similar to the work described above.

Beginning :

चतुर्दिक्षु लिखेच्चक्रं सप्त सप्त क्रमेण च ।
अष्टाविंशतिरेखायां वर्षचक्रं प्रकीर्तिता:(म्) ॥
कृत्तिकादीनि गण्यन्ते सङ्क्रान्त्या ऋक्षसंज्ञकाः ।
पूर्वादि गण्य लिख्यन्ते अभिजित्सह गण्यते ॥

End :

चतुरष्टा द्वादशी कृष्णे शुक्ले द्विनवपञ्चमी ।
यथा माता सुतं रक्षेत् तथा रक्षति चन्द्रमाः ॥
लग्नाष्टमो पञ्चमे वा राहुकेतुस्थिते यदि ।
तस्य जातस्य समये शिशौ च नालवेष्टनम् ॥

No. 13490. वर्षफणी.

VARṢAPHAṆĪ.

Substance, palm-leaf. Size, 1⅝ × 1¼ inches. Pages, 14. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 183*a*. The other works herein are Nāradīyasaṁhitā 1*a*, Narapatijayacaryā 108*a*, Kālacakra 154*a*, Jyautiṣadarpaṇa 167*a*.

Incomplete.

Similar to the above.

Beginning :

अथातस्सम्प्रवक्ष्यामि तच्चक्रं सप्त नाडिकाः ।
येन विज्ञातमात्रेण वृष्टिं जानाति साधकः ॥
कृत्तिकादि लिखेद्भानि नाडीचक्रं क्रमेण तु ।
सप्तनाडी भवेत्तत्र सव्यासं पन्नगाकृतिः ॥
ताराचतुष्कभेदेन नाड्येकैकाः प्रजायते ।
तासां नामान्यहं वक्ष्ये तथा चैवंपराणि च ॥
कृत्तिका च विशाखा च मैत्राख्यं भरणी तथा ।
ऊर्ध्वगा शनिनाडिः स्यात् चण्डवायुर्विनिर्दिशेत् ॥
रोहिणीस्वातिज्येष्ठाश्विद्वितीया नाडिका मता ।
आदित्यप्रभवा नाडी अनावृष्टिं विनिर्दिशेत् ॥

End :

यावद्रक्ततमो मेघो यावदग्निसमो रविः ।
यावद्वायव्यवायुश्च तावद्वृष्टिर्भविष्यति ॥
यावत्काकोदरो मेघो यावच्चन्द्रसमो रविः ।
यावन्निरृतिवायुश्च तावद्वर्षं विनश्यति ॥

रात्रिकालनिर्णयः ॥

Name of the former owner—

वेलमूरिवेङ्कम्भट्टुगारि ज्यौतिषपुस्तकम् ॥

No. 13491. वर्षफणी.

VARṢAPHAṆĪ.

Pages, 18. Lines, 7 on a page.

Begins on fol. 45*a* of the MS. described under No. 2510.

Complete.

This is a portion of the Varṣagaṇita described above and deals with the drawing of the snake-like diagram described under No. 13488.

Beginning:

अथातस्सम्प्रवक्ष्यामि चक्रं वर्षफणिं तथा ।
सस्यार्घवृद्धियुद्धादिफलाफलविनिर्णयः ॥
ऊर्ध्वेरेखा अष्टरेखास्तिर्यग्रेखाश्च पञ्चमम् ।
एवमष्टाविंशतिश्च ग्रहाः स्युश्च फणाकृतिः ॥
कृत्तिकादीनि ऋक्षाणि ईशाद्यश्च क्रमाद्दिशेत् ।
आर्द्रादिश्रवणान्तं च कन्यादिधनुरन्तकम् ॥
वर्षकाले स विज्ञेयमिति शास्त्रस्य निश्चितम् ।
मकरं कुम्भमीनं च कर्कीं वृश्चिक एव च ॥
जलराशिरिति प्रोक्तं शेषाश्च निर्जलाः स्मृताः ॥

* * * *

सायाह्ने क्षुद्भयं नृणां निशि चेन्निर्जलागमः ।
उषः(काले) महावृष्टिः परिवेषो यथाक्रमम् ॥

Colophon:

इत्यगस्त्यसंहितायां परिवेषक्रमः ॥

End:

गन्धर्वनगरं नाम उत्पातानि वदाम्यहम् ।
गन्धर्वनगरं गेहं गानं स्याद्वाद्यघोषकम् ॥
अलाताकृतिधूमाश्च प्र(ा)कारं गोपुराकृतिः ।
गजाश्वपशुपक्ष्यादिनानावर्णाकृतीर्दिशेत् ॥
रात्रौ प्रथमयामादिपूर्वादिवर्णतः क्रमात् ।
नन्दादिरिक्तति(थ)यः क्रूरग्रहस्थितके ॥
गन्धर्वनगरं दृष्ट्वा क्षामडाभ्रं (?) नृपक्षयः ।

Colophon:

वर्षफणिचक्रं सम्पूर्णम् ॥

No. 13492. वर्षवाक्यम्.
VARṢAVĀKYAM.

Substance, palm-leaf. Size, 9⅝ × 1⅜ inches. Pages, 9. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old. Incomplete.

Gives the formula for arriving at the time of the Mēṣasaṅkrānti in week days, Ghaṭikās and Vināḍikās for each of the 60 years commencing with Prabhava, Kali 4969. It also gives the time of the commencement of each of the 12 months in a year.

Beginning :

वर्षप्रवेशगणनवाक्यम्—

कलियुगादि ४९६९ विक्रमशक १९२५ शालीवाहनवर्षे १७९० वर्तमानप्रभववर्षगणनम्—

साङ्गदमीशं दानविकासं धीमधिरोऽयं नाकमभारम् ।
पावननावं श्रीपतिकामं लोभकलुषं घोटसुवासम् ॥
मे वरनारी तापदपूगी खोभगलोभी दायधिवाणी ।
धीमवनासं नीरनरोयं पाणिमगौरं क्रूरयमाश्रम् ॥

* * * *

कल्यब्दः ४९६९ ; प्रभववर्षम् साङ्गदमीशं ७, ३, ८, ५, ५ ; क + ब्द: ४९७०.

End :

क्रोधनवर्षे ५९ ; शीलदशाटी ५, ३. ८, ५, १ ; कल्यब्दः ५०२८ ; अक्षयवर्षम् तेन विटाङ्गी ६, ०, ४, १, ३.

Colophon :

वर्षवाक्यमक्षरसङ्ख्या संपूर्णं लिखितम् ॥

वृषभव्यासादिद्वादशसंक्रमणश्लोकः लिख्यते ।

श्रीर्गुणमित्रो भूविधिप श्रीरितिशूरो भोगवराते ॥
भाव चरोरी तेन वशत्वं लोकजभीतिः स्थूलहयोऽयम् ।
कालधिगारी स्तम्भितनाभिर्नित्यशशीशं यागमयूयम् ॥

No. 13493. वर्षादिविषयकग्रन्थः, कर्णाटकटीकासहितः.

VARṢĀDIVIṢAYAKAGRANTHAḤ WITH KANARESE MEANING.

Pages, 53. Lines, 4 on a page.

Begins on fol. 106*a* of the MS. described under No. 13446.

Incomplete.

On the nature of the influence, good or evil, exercised on the meteorological, economic and other conditions of a country by the planet when they occupy certain positions in relation to each other in a given year.

Beginning :

गौरी चारुबला रविशाशिनस . . हेदाननं तोयजं
धीरोनाभनमः समाथमहिमा लक्ष्मी . . . . . । .

भूरिर्दानबुधैर्हि सद्गति धवं जालन्धरामन्त्रिस-
द्रुद्रो वीरहरोऽसलो . . . . . कुधा सूनुजा ॥
रुद्रो भोगिशुभो गुणो हिमदमः सोमोसमोरं भजे
योगस्सीव्यखगि तदाशदतमो भावो भगश्चारसी ।
गौरीगात्रचिरंखरी युववशीसूतोमजोदेधसे
गोपीजारधिगो नृणां शशिहिमौ धर्मश्शशी सर्वदा ॥

End :

. . . भूभुजानां धान्यं समार्धं पयसां समृद्धिम् ।
क्षुद्रक्षितीशाः प्रबलास्समस्ता महीभृतो धर्मपरा भवन्ति ॥
वारेषुमर्धरात्रान्ता पश्चाद्रात्रिं परे दिनम् ।
मन्त्रिमेघस्य सस्यस्य रसधान्यस्य नीरसम् ॥

No. **13494.** वाक्यकरणम्.

VĀKYAKARAṆAM.

Pages, 102. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13399.

Breaks off in the 7th Adhyāya.

Gives certain tables of calculation for finding out the exact position of the planets Mars, Mercury, Jupiter, Venus and Saturn.

Beginning :

शम्बशक . . . . नः. ६६०. यो . . . . मः, ७७०, प्रमाणं कुम्भसूनुः ७१९.

* * * *

लक्ष्मीवनार्थनिघ्नः ८०. शूलंगानिदंशनैः १२०. उमाप्पुस्मरादाहज्ञः १५०. राज्यार्हयुद्धदनाः १८०. दरान्रूपनयादीनाम् २१०.

* * * *

कुजमायापरिवृत्ति १५७ समाप्तं वाक्यम् ॥

End :

इति वाक्यकरणे षष्ठोऽध्यायः समाप्तः ॥

कुजे माया बुधे रुद्रो गुरौ पुण्यं भृगौ मुनिः ।
धीरो दिनेशतनये पर्यायाः परिकीर्तिताः ।

* * * *

अन्तरद्गुमयोस्साम्ये यत्स्याद्वाक्येऽन्तराहतम् ।
त्यजेच्छोध्यान्तरहृतं ध्रुववाक्ये हितागमे ॥

No. 13495. वाक्यकरणम्.
VĀKYAKARAṆAM.

Pages, 39. Lines, 4 on a page.

Begins on fol. 6a of the MS. described under No. 13446.

Complete in six Adhyāyas.

An astronomical treatise dealing with the determination of week days, the position and movement of the planets, etc., with the time of solar and lunar eclipses, etc.

Contains the following Adhyāyas :--

१. पञ्चाङ्गराहुचारः.	४. ग्रहणाधिकारः
२. ग्रहचारः.	५. उदयास्तमयाधिकारः.
३. छायाधिकारः.	६. पातवैधृतिः.

Beginning :

प्रणम्य करिशैलस्थं महः कमललोचनम् ।
भास्करीयानुसारेण गणितं क्रियते लघु ॥
कल्यब्दो मातुलगुणो वर्षवांशेन संयुतः ।
पुनरब्दोन्मानगुणात्सालप्रियविवर्जितात् ॥
त[च्छ]त्समाप्तदिनैर्युक्तं शुक्रवारादिकं दिनम् ।
स्फुट . . . . ढार्कचक्रावधिकं सिनाभक्तावशेषितम् ।
श्रीगुणादिध्रुवं विन्द्यात् भान्तं वाक्यैस्तु दृश्यते ॥

End :

तत्कालचन्द्रपातार्कैः पुनः क्रान्ति पुनर्दिनम् ।
यदाक्रान्तिसमस्यातां पातमध्यं तदा भवेत् ॥
तत्कालचन्द्रमार्तण्डमुक्तलक्षणयोर्यदि ॥
गत्यन्तरांशकं प्रोक्तं मासार्धं रविचन्द्रयोः ॥

Colophon :

इति वाक्यकरणे पातवैधृतिः षष्ठोऽध्यायस्समाप्तः ॥

No. 13496. वाक्यकरणम्, कर्णाटकटीकासहितम्.
VĀKYAKARAṆAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 59. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains one to five Adhyāyas complete and breaks off in the sixth Adhyāya.

Same text as the above, and with Kanarese meaning word by word.

No. 13497. वाक्यकरणदीपिका.
VĀKYAKARAṆADĪPIKA.

Substance, paper. Size, 13½ × 8½ inches. Pages, 152. Lines, 23 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Contains the following Adhikāras :—

१. पञ्चाङ्गराहुचारः.	४. ग्रहणाधिकारः.
२. स्फुटाधिकारः.	५. उदयास्तमयाधिकारः.
३. त्रिप्रश्नाधिकारः which includes छायाधिकार.	

A commentary on the Vākyakaraṇa described under No. 13495 by Jambunātha Mahābhāṣyabhaṭṭa Sundararāja, son of Anantanārāyaṇa, who was the pupil of Padmagarbhayati, a famous astrologer who lived at the time of Tippu Sultan. This work is written in accordance with the views of Nīlakaṇṭhācārya of Nallūr in Malabar and has been approved of by Sōmadēva, son of Raṅganātha and grandson of Vāñcayyar who had another son named Varadarāja and who was the pupil of Nṛsiṁhasūri. The author is said to have lived in Viprasadgrāma (Pāpanallūr) on the banks of the river Kāvēri.

Beginning :

ज्योतिश्चक्रप्रवृत्ताय ज्योतीरूपाय भास्वते ।
ज्योतिर्दर्शाय भक्तेभ्यो ज्योतिश्शास्त्रकृते नमः ॥
श्रीनीलकण्ठाङ्घ्रिनिविष्टचेताः श्रीसोमदेवानुजिघृक्षयैव ।
विचित्रवाक्यैर्विवृतं पुनश्च प्रकाशयेऽहं करणं लघीयः ॥

स्वाभीप्सितग्रन्थस्य निष्प्रत्यूहपरिसमाप्तये प्रचयगमनविशिष्टाचारपरिपालनाभ्यां च स्वेष्टदेवतानमस्कारपुरस्कारेण चिकीर्षितमर्थं प्रतिजानीते—"प्रणम्य करिशैलस्थम्" इति ।

मू ॥ प्रणम्य करिशैलस्थं महः कमललोचनम् ।
भास्करीयानुसारेण गणितं क्रियते लघु ॥

व्या ॥ प्रशब्देन प्रणन्तुः भक्तिश्रद्धातिशयवत्त्वं त्रिविधनमस्कारश्च प्रतिपाद्यते । प्रणम्य-प्रकर्षेण सर्वैर्मनोवाक्कायैः करणैः ध्यात्वा स्तुत्वा प्रह्वीभूय च । किं करिशैलस्थं हस्तिगिरिनिवासं महः ब्रह्म मह इति श्रुतेः कमललोचनम् कमल-

मिव लोचनं यस्य तत्कमललोचनम् । भास्करीयानुसारेण भास्कराचार्यप्रोक्त-हरणपरिध्याद्युपदेशानुसारेण गणितं कालपरिच्छेदोपायभूतं कालक्रियाख्य-गणनं लघुशब्दप्रक्रियातो लघु क्रियते । करिशैलस्थं कमललोचनं महः प्रणम्य भास्करीयानुसारेण लघुगणितं क्रियते इति क्रियाकारकसम्बन्धः । अभिधेयं प्रतिज्ञाय श्रोतृजनप्रवृत्तये द्वितीयेन श्लोकेन तदुत्तरश्लोकादिपादत्रयसहितेन चक्राधिकमित्यन्तेन गणितशास्त्रप्रधानप्रतिपाद्यनवग्रहचाराद्यानयनसाधनीभूतभानु-मण्डलावसानिकभास्करभूमिभ्रमणभगणजनितविवरलक्षणाहर्गणमाह --कल्यब्द इति ।

* * * *

कर्मानुष्ठानकालसमानीतलग्नादिद्वादशभावस्थितस्फुटग्रहगत्यनुरूपशुभाशुभ-फलसंवाददर्शनात् । श्रीजिष्णुनन्दनार्यभटलल्लटनटेशपूर्तदामोदरपरमेश्वरवटश्चेरि-श्रीकेरलनीलकण्ठादिभिरपि उपगतस्फुटार्कचक्रावधिकोऽहर्गणः स्फुटाहर्गणासि-द्ध्यर्थमयमप्याचार्यः सालप्रियशोधनं कृतवान् । सालप्रियशोधनेन मध्यमाह-र्गणस्य स्फुटत्वापत्तौ युक्तिरुच्यते---

* * * *

सुन्दरेशकृते वाक्यकरणस्य प्रकाशने ।
सोमदेवाहृतेऽध्यायः प्रथमो लघुरीरितः ॥

Colophon :

इति वाक्यकरणे लघुप्रकाशिकायां सोमदेवाहृतायां सुन्दरराजविरचितायां प्रथमोऽध्यायः ॥

इति सुन्दरराजसोमदेवविरचितायां वाक्यकरणदीपिकायां स्फुटाधिकारो नाम द्वितीयोऽध्यायः ॥

End :

एवं वैधृतेरपि स्पर्शमोक्षकालावानेतव्यौ । अत्र गत्यन्तरांशकहृतमिति आचार्यखलेन(स्खलने)नोक्तवान् । यद्वा सूर्यसिद्धान्तकारादिना स्खालित्येनोक्तं न ज्ञातवान् । ग्रहणस्थित्यर्थे एव गत्यन्तरांशकैः हरणं युक्तमिति श्रीमत्के-रलसद्ग्रामनिवासिनीलकण्ठाचार्येण त्रिस्कन्धविद्यापारदृश्वना षड्दर्शनीपारङ्गते-नाश्वलायनसूत्रेण गर्गगोत्रेण शिवकलसन्द(शान्धि)जातेन गोलचूडामणिनास्म-दनुग्रहार्थे सुन्दरराजप्रश्नोत्तराख्ये ग्रन्थे प्रतिपादितव्यम् । तेन गतियोगेनैव विभज्य स्थितिदलं ज्ञेयम् । षष्ठाध्यायप्रथमेयं(?) द्वितीयाध्याये प्रायेणोक्तमिति न पुनरिदानीं व्याख्यातं प्रक्षिप्तत्वाच्च । अस्याध्यायस्य पञ्चमाध्यायेऽपि बहवः

श्लोकाः प्रक्षिप्तास्सन्ति । ते सर्वे निरस्ताः ' श्रीमन्ति(त्ति)पुराज काले पदवाक्य-प्रमाणज्ञो ज्योतिश्शास्त्रविशारदो यतीश्वरः पद्मगर्भ इति प्रसिद्धोऽपरो बृहस्पति-रिवासीत् । तस्मादेतस्मात् पिता प्रक्षेपव्यतिरिक्तं शुद्धवाक्यकरणमार्यानपि बहूनि गणितान्यध्यैष्ट । अस्मत्पितुरेवास्माकं वाक्यकरणसम्प्रदायान्तद(मीद)शमेव संप्रदा-यशुद्धम् । वाक्यकरणव्याख्या वयं किञ्चित् श्रीमन्नृसिंहशिष्यभूतज्योतिश्शास्त्र-विच्छ्रीवाञ्छयजन्मभारद्वाजवरदराजताद्दग्विधकनिष्ठपुत्रसोमदेवसंप्रदायशुद्ध - वाक्यकरणं चास्माकं संप्रदायसिद्धवाक्यकरणेन सम्मतेन एतद्व्याख्यानसिद्ध-प्रकारसिद्धं यन्मूलं तदेव शुद्धमूलमिति ज्ञेयम् ॥

सुन्दरेशकृते वाक्यकरणस्य प्रकाशने ।
सोमदेवाहृतेऽध्यायः पञ्चमो लघुरीरितः ॥
अनन्तनारायणसूनुना पुनः कवेरकन्यातटवासिना मया ।
प्रकाशिता वाक्यकृतिर्लघीयसी द्विजेशदेवानुजिघृक्षया लघु ॥

Colophon:

विप्रसद्ग्रामवासिना अनन्तनारायणपुत्रजम्बूनाथमहाभाष्यभट्टसुन्दरराजेन श्रीवाञ्छयजन्मश्रीरङ्गनाथपुत्रसोमदेवाहृतेन विरचितायां वाक्यकरणलघुदीपि-कायां पञ्चमोऽध्यायस्समाप्तः ॥

No. 13498. वाक्यकरणदीपिका.
VĀKYAKARAṆADĪPIKĀ.

Pages, 84. Lines, 9 on a page.

Begins on fol. 9*a* of the MS. described under No. 13400.
Breaks off in the third Adhyāya.
Same work as the above.

No. 13499. वाक्यगणितम्, द्राविडव्याख्यासहितम्.
VĀKYAGAṆITAM WITH TAMIL MEANING.

Pages, 89. Lines, 7 on a page.

Begins on fol 8*a* of the MS. described under No. 13401.
Incomplete.

On the method of determining accurately the position of the planets in a given year. From the first stanza found herein, it is inferred that the work should have been written between Śakas 1729 and 1789 corresponding to 1806 and 1866 A.D.

Beginning :

षष्टिस्त्रयोविंशतिगुणितं व्यपगतसंवत्सरेण संमिश्रम् ।
नववेदाग्निसंयुक्तं शकनृपकालं विजानीयात् ॥
धूसीकालयुतं वर्षं कल्यब्दमिति कथ्यते ।
कल्यब्दो मातुलगुणान् वर्षवांशेन संयुताम् ॥
पुनरब्दान् मानगुणान् सालप्रियविवर्जितः ।
तत्समासदिनैर्युक्तं शुक्रवारादिकं दिनम् ॥
* * * *

सूर्यस्फुटसाधनम्—

गतमासैर्गतदिनैः शेषसङ्क्रमनाडिभिः ।
तत्र योग्यादिकं योग्यं नाडीष्वेव रविस्फुटम् ॥

End :

ஷமணமென்னும்படி ஷண்ணத்தைவச்சு மொக்ஷ: என்று ஹரிச்சு வந்த கலையை மூன்பாகங்களில் கூட்ட ௫௬ என்று மூனு கூ கலையைக்கொண்டு தாஜகாஷிகலைபொரெஷ்டா பக்ஷ: என்று கலையாகக் கூட்ட இது ராஹுமாஷ்டியம். இந்த ராஹுமாஷ்டியத்தை ஷேஷம் 12 ராசியில் வாங்க இது ராஹுஸ்பஷ்டமாம். இந்த ஸ்பஷ்டத்தில் ௬ ராசிகூட்ட கேது ஸ்பஷ்டமாம்.

No. 13500. वाक्यगणितम्, द्राविडटीकासहितम्.
VĀKYAGAṆITAM WITH TAMIL MEANING.

Pages, 27. Lines, 25 on a page.

Begins on fol. 6*b* of the MS. described under No. 13402.

Incomplete.

This MS. was copied from the one described under the last number.

Same work as the above.

No. 13501. वाक्यगणितम्, आन्ध्रटीकासहितम्.
VĀKYAGAṆITAM WITH TELUGU MEANING.

Pages, 9. Lines, 8 on a page.

Begins on fol. 11*a* of the MS. described under No. 13449.

Incomplete.

Same work as the above.

No. 13502. वाक्यगणितम्.

VĀKYAGAṆITAM.

Substance, palm-leaf. Size, 15 × 1⅛ inches. Pages, 17. Lines, 7 on a page. Character, Grantha and Tamil. Condition, good. Appearance, old.

Begins on fol. 34*a*. The other works herein are Lampāka 1*a*, Pañcāṅgagaṇita 42*b*.

Incomplete.

Same work as the above.

No. 13503. वाक्यगणितविचारः.

VĀKYAGAṆITAVICĀRAḤ.

Substance, palm-leaf. Size, 13½ × 1 inches. Pages, 26. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Wants the beginning and the end.

A discussion on the relative importance of the two methods of drawing up the Hindu calendars, viz., that based upon the rules enunciated by Vararuci and generally known as Vākyagaṇitam and that based upon the direct observation of the heavenly bodies, i.e., Dṛggaṇitam. Herein the author apparently comes to the conclusion that the method of Vākyagaṇitam is by far the better one.

Beginning :

एवं सामान्यत आर्षत्वे सिद्धे—

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।

पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

इति वैयाकरणैर्मङ्गलार्थतया पठ्यमानश्लोकेन तस्य वररुच्याख्यमुनिप्रणीतत्वसिद्धिरिति तदे[व]तदत्यन्तपरिहास्यम् । उदाहृतश्रुतिस्मृत्योर्वाक्यशब्दस्याखण्डस्यैव विद्याविशेषवाचकत्वेन भाष्यादिषु व्याख्यातत्वात् वाक्यशब्दस्य पृथगर्थकत्वानुपपत्तेः । अत्र वाको वाक्यशब्दस्तर्कशास्त्रपर इति भाष्यकृतः । किंस्विदासीत्पूर्वचित्तिरित्यादिः प्रश्नोत्तररूपः मात्रभाग इति विज्ञानेश्वरादयः । तत्र श्रुतौ ज्योतिश्शास्त्रवाचकं पादान्तरं नास्तीत्येतदपि पूर्वोत्तरपर्यालोचनाविधुरम् ।

नचापौरुषेयं भास्करतन्त्रमार्षमूलकं भविष्यति तत्प्रामाण्याच्चार्षमूलकत्वमस्याप्यविरुद्धमिति वाच्यम् । भास्करीयस्यार्यभटीयाख्यापौरुषेयतन्त्रान्तरमूलकत्वस्य विस्पष्टत्वात् । आर्यभटस्यापि षष्ट्यब्दानां षष्टिः यदा व्यतीताः त्रयश्च युग-

पादाः ऽभ्यधिका विंशतिरब्दाः तदेह मम जन्मनोऽतीता इति स्वीयश्लोकेनैव स्वजन्मकालकथनात् ।

* * * *

पौरुषेयग्रन्थानां दृग्वैषम्यं भूयिष्ठमार्षाणां तु अल्पतरमिति । नचैतावता तत्प्रामाण्यसिद्धिः । अत एव वाक्यकरणकृता आर्यभटीयं सर्वकालेषु दृक्समं कर्तुं संस्कारं कल्पयिता तस्य प्रामाण्यं निर्व्यूढम् । अत एव च वाक्यकरणं शिष्टैरप्यङ्गीकृतमिति चेन्न । एवं सति वाक्यकरणकृतः आर्यभटीयं संस्कृत्य प्रमाणं कुर्वतः ततोऽपि लघुतया आर्षग्रन्थानेव संस्कृत्य तत्प्रमाणीकरणे अत्यन्तयुक्ततोपपत्तेः ।

End:

तुल्यौ राश्यादिभिः स्याताममावास्यान्तकालिकौ ।
सूर्येन्दू पौर्णमास्यन्ते भार्धे भागादिभिस्समौ ॥

इति वचनविरोधश्च । तत्रामावास्यान्ते सूर्येन्द्वोस्समकालत्वं पौर्णमास्यन्ते षड्राश्यन्तरितत्वं न नियतमित्यभिधानादिति चेन्मैवम् । अयनादिसंस्कारस्तावत् दृक्सिद्ध्यर्थोऽपि सतिथिनक्षत्रादिकालज्ञानोपयुक्तय . . . . स एव स्फुटम् । स्फुटीकरणन्तु तिथिनक्षत्राद्यानयनात्प्रागेवोक्तत्वात्तत्र उपयुज्यते । तत्पुनः दृक्सिद्ध्यर्थमपि न सर्वे.

No. 13504. सङ्क्रान्तिवाक्यम्.
SAṄKRĀNTIVĀKYAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13449.

Incomplete.

On the calculations to be made with a view to ascertaining the exact time when the Sun passes from one Rāśi (sign of the zodiac) to another This work was apparently written between Śaka 1729 and 1789, i.e., 1806 to 1866 A.D.

Beginning:

प्रभवादिगताब्दं तु धारासेव्यशकाब्दकम् ।
धूसीकालयुतं वर्षं कल्यब्दमिति कथ्यते ॥
कल्यब्द . . . . गुणान् वर्ष(वां)शेन संयुतम् ।
पुनरब्दान् मासगुणान् नालप्रियविवर्जितान् ॥
तत्समासैर्दिनैर्युक्तं शुक्रादिकलिवासरम् ।
शेषं षष्टिगुणं कृत्वा मेषसङ्क्रान्तिनाडिका ॥

माससङ्क्रान्तिवाक्यम्—

. . . . १, विश्वाधिकप्रीतः २, श्रेष्ठक्षेमगन्धः ३.

End:

द्वादश्यादौ पौर्णमान्ते कृष्णे चतुर्थ्यमादिषु ।
सप्तम्यान्तैकदश्यादौ भवादिभद्रसप्तकम् (?) ॥
चतुर्दश्यां त्य शे गुनि अमाश्रातुष्पदे नगे (?) ।
प्रतिपद्यौ किमिस्तुघ्ने . र . . . . . . ॥

No. 13505. सिद्धान्तशिरोमणिः, वासनाभाष्यसहितः.

SIDDHĀNTAŚIRŌMAṆIḤ WITH VĀSANĀBHĀṢYA.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{5}{8}$ inches. Pages, 376. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Adhyāyas entitled Gōla and Grahagaṇita.

Foll. 189 to 249 contain Navagrahapadaka.

The text is the same as that described under R. No. 313 of the Triennial Catalogue, Vol. I, Part I-A. The commentary is called Vāsanā and was written by the author of the text, Bhāskarācarya. The work has been printed.

Beginning:

गोलाध्याये निजे या या अपूर्वा विषमोक्तयः ।
तास्ता बालावबोधाय संक्षेपाद्विवृणोम्यहम् ॥

गोलग्रन्थो हि सविस्तारतया प्रोज्वलः । किन्तु अत्र अपूर्वा या या वाक्यै-रुक्ता उक्तयो विषमास्तास्ताः सङ्क्षेपाद्विवृणोमि । अत्र या या इति प्रथमान्तं पदम् । तास्ता इति द्वितीयान्तं पदं । बुद्धिमता व्याख्येयम् । तत्रादौ तावत् अभीष्टदेवतानमस्कारपूर्वं गोलं ब्रवीमीत्याह—

सिद्धिं साध्यमुपैति यत् स्मरणतः क्षिप्रं प्रसादात्तथा
यस्याश्चित्रपदा स्वलङ्कृतिरलं लालित्यलीलावती ।
नृत्यन्ती मुखरङ्गगेव कृतिनां स्याद्भारती भारती
तं तां च प्रणिपत्य गोलममलं बालावबोधं ब्रुवे ॥

ब्रुवे वच्मि । कः कर्ता, अहं भास्करः । कं, गोलं गोलाध्यायम् । किं-विशिष्टम्? अमलम् निर्दूषणम् ।

* * * *

तां च प्रणिपत्येति । मङ्गलादीनि मङ्गलान्तानि च शास्त्राणि अलङ्कारकृत. मतानि । अतः सिद्धिवृद्धिशब्दावाद्यन्तयोर्निक्षिप्तौ ।

अथ गोलग्रथनकारणमाह ।

मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना
प्रौढिं प्रौढसभासु नैति गणको निस्संशयो न स्वयम् ।
गोले सा विमला करामलकवत् प्रत्यक्षतो दृश्यते
तस्मादस्म्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः ॥

इदानीं गोलप्रशंसया गोलानभिज्ञगणकोपहासं श्लोकद्वयेनाह—

भोज्यं यथा सर्वरसं विनाज्यं राज्यं यथा राजविवर्जितं च ।
सभा न भातीव सुवक्तृहीना गोलानभिज्ञो गणकस्तथात्र ॥

End:

इदानीं पातप्रयोजनम्—

पातस्थितिकालान्तर्मङ्गलकृत्यं न शस्यते तज्ज्ञैः ।
स्नानजपहोमदानादिकमत्रोपैति खलु यतो वृद्धिम् ॥

Colophon:

इति श्रीमहेश्वरोपाध्यायसुतभास्कराचार्यविरचिते सिद्धान्तशिरोमणौ वासनाभाष्ये मिताक्षरे गणिताध्याये पाताध्यायः ॥

समाप्तोऽयं गणिताध्यायः पाताध्यायग्रन्थः ३४०१ । सर्वगणिताध्यायग्रन्थसंख्या सव्याख्या ॥ ४८३४९ ॥

चक्षुर्लौकिकवैदिकव्यवहृतेः प्रत्यक्षसत्प्रत्ययं
शास्त्रं खेचरचक्रचारचरिते सिद्धान्तबोधप्रदम् ।
तस्य प्रस्फुटसोपपत्तिरचनाचातुर्यचिन्तामणिं
श्रीसिद्धान्तशिरोमणिं व्यरचयच्छ्रीभास्करार्यः सुधीः ॥

The scribe adds—

सोऽयं कालबलात् कलावतिबले लोकाविवेकादलं
संप्राप्तो विरलप्रचारमथ तत्प्रोद्बोधसंसिद्धये ।
पूर्णे भाश्वशशाङ्कपिङ्गलतमे मासस्थराकातिथौ
संपूर्णं व्यलिखत् सगोलगणिताध्यायौ सुधीः कृष्णभट्ट ॥

No. 13506. सिद्धान्तशेखरः.
SIDDHĀNTAŚEKHARAḤ.

Pages, 126. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 13426.
Complete in the undermentioned 20 Adhyāyas.

१. ग्रहभगणाध्यायः.	११. ग्रहयुद्धाध्यायः.
२. ग्रहभगणाध्यायः.	१२. भयोगाध्यायः.
३. मध्यस्फुटाध्यायः.	१३. व्यक्तगणिताध्यायः.
४. त्रिप्रश्नाध्यायः.	१४. अव्यक्तगणिताध्यायः.
५. चन्द्रग्रहणाध्यायः.	१५. वासनाध्यायः.
६. सूर्यग्रहणाध्यायः.	१६. गोलवर्णनाध्यायः.
७. पर्वानयनाध्यायः.	१७. राहुनिराकरणाध्यायः.
८. पाताध्यायः.	१८. ग्रहोपवर्तिवर्णनाध्यायः.
९. ग्रहोदयास्तमयाध्यायः.	१९. यन्त्रविधिः
१०. चन्द्राध्यायः.	२०. गोलप्रश्नविधिः.

An astronomical treatise by Śrīpati, dealing with Siddhānta, one of the three topics constituting the Indian astrological science. Its scope is explained in the third stanza of the work (quoted below) and the headings of the Adhyāyas given above indicate more fully the subjects dealt with therein.

Beginning :

यत्तेजः पितृधाम्नि शीतमहसः पाथोमये मण्डले
सङ्क्रान्तं कुमुदाकरस्य कुरुते काञ्चिद्विकासश्रियम् ।
चञ्चच्चञ्चुपुटैश्चकोरनिकरैश्चापीयतेऽसौ चिरं
त्रैलोक्यालयदीपको विजयते देवो निधिस्तेजसाम् ॥

निजगुरुपदद्वन्द्वं कृत्वा मनस्यतिभक्तितः
गणकतिलकः श्रीपूर्वोऽयं पतिर्द्विजपुङ्गवः ।
स्फुटमविषमं मन्दप्रज्ञप्रबोधविवृद्धये
ललितवचनैः सिद्धान्तानां करोति हि शेखरम् ॥

शतानन्दाब्दास्तिप्रभृति त्रुटिपर्यन्तसमय-
प्रभीणं भूधिष्ण्यग्रहनिवहसंस्थानकथनम् ।

ग्रहेन्द्राणां चारास्सकलगणितं यत्र गदितं
स सिद्धान्तः प्रोक्तो विपुलगणितस्कन्धकुशलैः ॥

* * * *

ज्योतिर्ग्रहाणां विधिवासरादौ सृष्टिर्लयस्तद्दिवसावसाने ।
यस्मादतोऽस्मिन् गणिते ग्रहाणां योग्यो मतो नः खलु कल्प एव ॥
सत्सु ग्रहेषु तच्चारजिज्ञासुष्वपि युज्यते ।
तज्जिज्ञासा नमस्तेभ्यो भवेद्येषामसत्स्वपि ॥
वर्तमानकदिने मनवः षट् सप्तमस्य च चतुर्युगसङ्ख्या ।
भैर्मितानु च युगत्रयमन्यद्भारतात् गुरुदिनाच्च गतं प्राक् ॥
स्वायंभुवाख्यो मनुराद्य आसीत् स्वारोचिषश्चोत्तमतापसौ च ।
जातौ ततो रैवतचाक्षुषौ च वैवस्वतस्सम्प्रति सप्तमोऽयम् ॥

* * * *

सौरैचान्द्रमससावनमानैस्सौडवैग्रहगतेरवबोधः ।
एभिरत्र मनुजव्यवहारो दृश्यते च पृथगेव चतुर्भिः ॥
वर्षाणि सौरान् प्रवदन्ति चान्द्रान् मासांस्तिथिस्सावनतो दिनानि ।
सौरैन्दवाभ्यां तु विना न तत्स्यात् नाक्षत्रमानात् घटिकादिकालः ।

Colophon :

इति श्रीपतिविरचिते सिद्धान्तशेखरे ग्रहभगणाध्यायः ॥

End :

इन्दोर्भागानयननिहताः पक्षयुक्तास्तु लिप्ताः
पादस्तासामपि च विकलास्तद्युतिस्सप्त नन्दाः ।
दृष्टा पारे दितिसुतगुरोरानयाद्भागणं द्रा-
गिन्दुस्ताहग्भवति स कदा मन्दपारे च विद्वन् ॥
प्रतिकञ्चुकक्रुत्क्रुद(त)घ्न विद्वन् पतिता धार्मिकमूर्खदुर्जनेभ्यः ।
इह(?) तनूरुहस्यमप्रमेयं ददतस्स्यात्सुकृतायुषोर्विनाशः ॥
भक्ताय शिष्याय चिरोषिताय गुणोपपन्नाय च देयमेतत् ।
भ्रात्रे च मित्राय च सूनवे च सुदुर्लभस्स्यादिह गोलतत्त्वम् ॥
पूर्वप्रणीतकृततन्त्रसदुक्तियुक्तिमुक्ताफलैः क्रमनिवेशनभङ्गधीरः ।
श्रीश्रीपतिर्गणकचक्रविभूषणाय सिद्धान्तशेखरममुं ग्रंथयांचकार ॥

Colophon :

इति श्रीमच्छ्रीपतिविरचिते सिद्धान्तशेखरे गोलप्रश्नविधिः विंशोऽध्यायः ॥

The scribe adds—

धन्येऽब्धिदेशतोये युगणे श्रीपतिशर्मणा ।
सिद्धान्तशेखरमिदं पुस्तकं लिखितं मया ॥

No. 13507. सूर्यचन्द्रगतिनिर्णयः, आन्ध्रटीकासहितः.

SŪRYACANDRAGATINIRṆAYAḤ WITH TELUGU MEANING.

Pages, 2. Lines, 6 on a page.

Begins on fol. 124*a* of the MS. described under No. 6470.

Incomplete.

On the nature of the movements of the Sun and the Moon in the heavenly regions during the dark and the bright fortnights of the Dakṣiṇāyaṇam (the duration of the time of the Sun's passage from the summer to the winter solstice) and the Uttarāyaṇam (the duration of the time of the Sun's passage from the winter to the summer solstice).

Beginning and **end** :

लक्ष्मीपतिः कमलसम्भवमुख्यदेव-
संसद्धि(सेवि)ताङ्घ्रियुगलः कमलायताक्षः ।
श्रीवत्सकौस्तुभमणिद्युतिरञ्जिताङ्गो
नारायणो मनसि मे वसतिं निविष्टः ॥
ब्रह्माच्युतेशनिगमागमयज्ञमूर्तिः
सृष्टिस्थितिप्रलयकृत्समयस्य हेतुः ।
तेजोनिधिस्त्रिभुवनालयमुख्यदेवो
भूयात्सदा दिनकरो मम वाक्प्रसिद्ध्यै ॥
पात्रं नभो धिष्ण्यगणः प्रवृत्तिः स्नेहश्शशाङ्को र . . . तेजः ।
ज्वालाश्रयस्यारमुखा ग्रहेन्द्रा जगन्मये सद्मनि जातजन्तोः ॥
स्थायी भानुः कृष्णपक्षे स्वकीये वामे मार्गे दक्षिणस्यां प्रयाति ।
गच्छेच्चान्द्रे शुक्लपक्षे तु सव्ये मार्गे सम्यक्कौशलेनैवमुक्तम् ॥
यायी चन्द्रः शुक्लपक्षे स्वकीये वामे मार्गे चोत्तरस्यां प्रयाति ।
कृष्णे पक्षे सव्यमार्गे तु यायादेवं भानोश्शीतरश्मेर्गतिस्स्यात् ॥

No. 13508. सूर्यसिद्धान्तः—सव्याख्यः.

SŪRYASIDDHĀNTAḤ WITH COMMENTARY.

Substance, paper. Size, 13¼ × 8⅜ inches. Pages, 266. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the Yantrādhyāya which is the 13th Adhyāya.

Same text and commentary as that described under R. No. 1706 of the Triennial Catalogue, Vol. II, Part I-C. The additional portions in the beginning are given below and it is stated therein that the author Cōlavipaścit was the son of Ārya-Sūrya.

Beginning :

प्रणिपत्य महत्सत्यं ब्रह्माच्युतशिवात्मकम् ।
अनिर्दंपदसंवेद्यजगच्चक्षुस्सनातनम् ॥
आर्यसूर्यतनूजेन विद्वत्पादाब्जसेविना ।
त्रिस्कन्धार्थविदा सम्यङ्नाम्ना चोलेन सूरिणा ॥
व्याख्यानं क्रियते यथामति मया प्रश्नस्य तत्तत्क्रिया-
मुद्यन्मन्दधियामनुग्रहकृते शेषैर्विशेषैस्समम् ।
येन श्रोत्रपथागतेन नितरामारात् समाराध्यते
ज्योतिःशास्त्रविवेकपाकविदुषामेषां समेषां मनः ॥

मू ॥ अचिन्त्याव्यक्तरूपाय(. . .)ब्रह्मणे नमः ॥

व्या ॥ प्रारिप्सितस्य प्रबन्धस्य निर्विघ्नपरिसमाप्तिहेतोरभिमतदेवतानमस्कारः क्रियते । आचिन्त्याव्यक्तरूपाय मनोबुद्ध्यादिभिरनभिगम्य इति यावत् । चिन्तयितुमशक्यः अचिन्त्यः अव्यक्तरूपः अव्यक्तं रूपं यस्येति स तथोक्तस्सच्चिदानन्दस्वरूप इत्यर्थः । अचिन्त्यश्चासावव्यक्तरूपश्चेति कर्मधारयसमासः ।

* * * *

मू ॥ इत्थं युगसहस्रेण भूतसंहारकारकः ।
कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती ॥

व्या ॥ इत्थमनेन प्रकारेण युगसहस्रेण चतुर्युगाणां सहस्रेण भूतसंहारकारक. प्राणिनां संहारस्य कारकः कर्ता ।

* * * *

उत्तरार्धमिति । प्रतिकल्पमित्यर्थः । युगसहस्रेण भूतसंहारकारकः परोऽपि कल्पोऽपि भवतीति सूचयितुमलमतिप्रसङ्गेन ॥

End :

Colophon :

प्रज्ञोदग्रविशिष्टशिष्यनिवहश्लाघ्योपदेशक्रिया-
प्रत्यक्षीकृतविप्रकीर्णविषयस्कन्धत्रयीमर्मणा ।
चोलाख्येन विपश्चिता विरचिते श्रीसूर्यसिद्धान्तिक-
व्याख्याने विशदोऽयमुज्ज्वलपदोऽध्यायो गतो द्वादशः ॥

अथ यन्त्राध्यायो व्याख्यायते—तद्ग्रहविशेषमदृष्टरूपत्वात् बु . . . . . लम्बत इति काष्ठादिभिः गोलयन्त्रं बद्ध्वा प्रदर्शितव्यमिति ।

* * * *

अत्रेदमनुसन्धेयम् । जलनिस्रावो यथागोप्यस्तथा कार्य इति प्रकारोऽयं प्रथमप्रकारात् साधुः । यतस्तत्र वा तस्यांश . . . . धियाभ्यूह्यम् ।

No. **13509.** सूर्यसिद्धान्तः, सव्याख्यानः.

SŪRYASIDDHĀNTAḤ WITH COMMENTARY.

Substance, paper. Size, 12 × 9¾ inches. Pages, 135. Lines, 29 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the 16th stanza of the Jyautiṣōpaniṣadadhyāya (the 13th).

Same work as the above; but with Ravyādidinagati given in the end.

अथ रवेर्दिनगतिर्लिख्यते—

१. ०, ९९, ८, १०, २७ ३५९७०८०.
२. ०, १, ५८, १६, २०, ९४७१९४१६०.
३. ०, २, ५७, २४, ३०, ८, २०७९१२४०.
४. ०, ३, ५६, ३८, ४०, १०, ९४३८८३२०.
५. ०, ४, ५५, ४०. ९०, १३, ६७९८५४००.

* * * *

५००. ३, १८, १०, ३३, ९१, ४९, ७०९, ९८६३४७.
६००. १९, १५, ४८, ४०, ३८, ११, ९३९९२००५९९१.
७००. ७, १३, २६. ४७, २४, ३३, ३६२२५३७९९.

No. **13510.** सूर्यसिद्धान्तः, सव्याख्यः.

SŪRYASIDDHĀNTAḤ WITH COMMENTARY.

Substance, paper. Size, 8½ × 6⅝ inches. Pages, 190. Lines, 36 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 14 Adhyāyas.

Same text and Yallayārya's commentary called Kalpavallī as that described under R. No. 1708 of the Triennial Catalogue, Vol. II, Part I-C.

Date of transcription : Sunday, the 6th day of the bright fortnight of the Bhādrapada month in the year Naḷa.

No. **13511.** सूर्यसिद्धान्तः, सव्याख्यः.

SŪRYASIDDHĀNTAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 17¼ × 1 inches. Pages, 78. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the Sphuṭādhikāra (the second).

Same text and commentary as the above, but with an introductory stanza in the beginning.

Beginning :

. . . . . कल्याणगुणसागरः ।
कल्याणदो भवानीशः कल्याणं मे वितन्वतु ॥

No. **13512.** सूर्यसिद्धान्तः, कर्णाटकटीकासहितः.

SŪRYASIDDHĀNTAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, 11⅝ × 1¼ inches. Pages, 268. Lines, 5 on a page. Character, Telugu and Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Ariṣṭanavanīta with commentary fol. 136*a*.

Complete.

Same text as the above and with meaning in Kanarese by Amarēḍya, son of Gōsvāmin who salutes Candrabhūṣaṇa, as an ornament among astrologers and medical men.

Beginning :

गोस्वामिसूनुरमरेड्य इति प्रसिद्धो दैवज्ञवैद्यविदुषां तिलकं प्रणम्य ।
श्रीचन्द्रभूषणगुरुं करवाणि सूर्यसिद्धान्तमीड्यमहमद्भुतबोधनार्थम् ।
अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥

* * * *

अल्पावशिष्टे तु कृते मयो नाम महासुरः ।
रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम् ॥
वेदाङ्गमग्र्यमखिलं ज्योतिषां गतिकारणम् ।
आराधयन् विवस्वन्तं तपस्तेपे सुदुष्करम् ॥
* * • *
दन्त (छन्दः) पादौ तु वेदस्य हस्तौ तत्त्वे तु (कल्पस्तु) पठ्यते ।
मुखं व्याकरणं तस्य ज्यौतिषं नेत्रमुच्यते ॥
* * * *
तोषितस्तेन तपसा प्रीतस्तस्मै वरार्थिने ।
ग्रहाणां चरितं प्राह मयाय सविता स्वयम् ॥
* * * *
श्रीसूर्यांशपुरुषो(ष उ)वाच—
शृणुष्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमम् ।
युगे युगे महर्षीणां स्वयमेव विवस्वता ॥
* * * *
शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्करः ।
युगानां परिवर्तेन कालभेदोऽत्र केवलम् ॥
* * * *
भूतानामन्तकृत्कालः कालोऽन्यः कलनात्मकः ।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्तमिष्यते ॥

Colophon:

इति सूर्यसिद्धान्तभाष्ये अमरेज्यविरचिते मध्यमानयनो नाम प्रथमोऽध्यायः ॥

End:

इत्युक्त्वा मयमामन्त्र्य स भक्तेनातिपूजितः ।
दिवमाचक्रमे . . . . . स्वमण्डलम् ॥
मयोऽथ दिव्यं तत् स्थानं ज्ञात्वा साक्षाद्विवस्वतः ।
कृतकृत्यमिवात्मानं मेने निर्धूतकल्मषम् ॥
ज्ञात्वा तमृषयश्चाथ सूर्यभक्तवरं मयम् ।
. परि . . रुपेत्याथो ज्ञानं पप्रच्छुरादरात् ॥

स तेभ्यः प्रददौ प्रीतो गुरूणां चरितं महत् ।
अत्यद्भुततमं लोके रहस्यं ब्रह्मसंज्ञितम् ॥

Colophon :

इति श्रीसूर्यसिद्धान्ते अध्यात्मसंज्ञितो नाम चतुर्दशोऽध्यायः ॥

No. 13513. सूर्यसिद्धान्तः.
SŪRYASIDDHĀNTAḤ.

Pages, 39. Lines, 25 on a page.

Begins on fol. 1*a*. of the MS. described under No. 13387.

Complete.

Same text as the above.

No. 13514. सूर्यसिद्धान्तज्यागणितम्.
SŪRYASIDDHĀNTAJYĀGAṆITAM.

Pages, 23. Lines, 30 on a page.

Begins on fol. 34*a* of the MS. described under No. 1909, wherein this work has been omitted to be included in the list of other works.

Complete.

Gives astronomical tables for finding out the position of the five planets Mars, Mercury, Venus, Jupiter and Saturn in their movements through the signs of the Zodiac. The author is Bhairava of Vāraṇāsi family and of Hārītagōtra. He was a resident of Piṭhāpura. He lived after Kali 4968 (1866 A.D).

Date of copying : Tuesday, the first day of the dark fortnight of the Śrāvaṇa month in the year Prajōtpatti. Name of the copyist : Cintāmaṇi Raghunāthācāryar of Cennapaṭnam.

Beginning :

वन्दे श्रीदक्षिणामूर्तिं वटमूलनिवासिनम् ।
चिन्मुद्राकलितं शान्तं चिदानन्दमहं शिवम् ॥
राजराजेश्वरीयुक्तं राजराजजटावलिम् ।
पीठिकापुरवास्तव्यं कुक्कुटेशमहं भजे ॥
तत्राभूद्भुवनप्रसिद्धयशसां ब्रह्मात्मना पश्यतां
साक्षात् वेदगणानधीत्य विदितं कर्मानिशं कुर्वताम् ।
पुंसां श्रीहरिताख्यगोत्रजनुषां श्रीवारणास्याह्वये
वंशे पण्डितभूसुरोत्तमनुतो रत्नाकरोऽहं बुधः ॥

सिद्धान्तिनां भैरवनामकोऽहं श्रीज्यौतिषाख्यं निगमं विचिन्त्यम् ।
श्रीसूर्यसिद्धान्तविचक्षणत्वं सम्यग्ज्ञात्वा प्रकीर्त्यते ॥

अथप्रतिज्याग्रन्थं मया सविशेषा लिख्यन्ते—

द्व्यशीति ८२ षष्टि ६० वर्षघ्नं गजवेदसमन्वितम् ।
प्रभवाद्यब्दसंयुक्तं भवेयुः कलिवत्सराः ॥
युगाब्धिनन्दवेदानां ४९४४ रहिते कलिवत्सराः ।
ध्रुवाब्दोऽर्कगुणी १२ मासयुक्तोऽधो नख २० ताडितः ॥

End:

मन्दस्फुटीकृतां भुक्तिं प्रोज्झ्य शीघ्रोच्चभुक्तितः ।
तच्छेषं चच(विव)रेणाथ हार्यो त्रिज्यान्त्यकर्णयोः ॥
चलकर्णहृतां भुक्तौ कर्णे त्रिज्याधिके धनम् ।
ऋणमूनेऽधिके प्रोज्झ्य भुक्तिवक्रगतिर्भवेत् ॥

Colophon:

इति श्रीसूर्यसिद्धान्ते कुजादिपञ्चग्रहाधिकारः समाप्तः ॥

Beginning: of the tables.

श्रीसूर्यसिद्धान्ते तेन रव्यादिमध्यग्रहपदकान्यन्तराणि मया सविशेषाणि लिख्यन्ते ॥

रविदिनपदकानि—

१. ०, ०, ५९, ८, १०.	३. ०, २, ५७, २४, ३०.
२. ०, १, ९८, १६. २०.	४. ०, ३, ९६, ३२, ४०.

* * * *

ध्रुवं ९. २४. ३०. ४४. २६.

Colophon:

रविमध्यपदकानि समाप्तानि ॥

End:

२३. ४९८. २९. आ १. ६९०. ०.
२४. ४९९. ३७. आ ०. ०. ५०. ०.

Colophon:

इति श्रीसूर्यसिद्धान्ते शनिमन्दपदकानि समाप्तानि ॥

No. 13515. सोमसिद्धान्तः.
SŌMASIDDHĀNTAḤ.

Pages, 39. Lines, 20 on a page.

Begins on fol. 32*a* of the MS. described under No. 3894.

Complete.

Same text as that described under R. No. 1715 of the Triennial Catalogue of MSS., Vol. II, Part I-C.

B. NATURAL ASTROLOGY.

No. 13516. कालक्रियानिर्णयः.
KĀLAKRIYĀNIRṆAYAḤ.

Pages, 26. Lines, 42 on a page.

Begins on fol. 10*a* of the MS. described under No. 9993.

Incomplete.

A treatise based on the Dharmasindhu, the Nirṇayasindhu and other digests laying down what time is auspicious or otherwise for the performance of particular acts, rites, ceremonies, feasts, etc.

Beginning:

धर्मसिन्ध्वन्तर्गतकालक्रियानिर्णयोद्देशसङ्ग्रहो यथा—

दृष्ट्वा पूर्वनिबन्धान् निर्णयसिन्धुक्रमेण सिद्धार्थान् ।
प्रायेण मूलवचनान्युझि(ज्झि)त्य लिखामि बालबोधाय ॥

तत्र कालष्षड्विधः—वत्सरः १. अयनम् २. ऋतुः ३. मासः ४. पक्षः ५. दिवसः ६. इति.। वत्सरः पञ्चधा—चान्द्रः १. सौरः २. सावनः ३. नाक्षत्रः ४. बार्हस्पत्यः ५. इति । शुक्लप्रतिपदादिदर्शान्तैश्चैत्रादिसंज्ञैर्द्वादशभिर्मासैः चतुःपञ्चाशदधिकशतत्रयदिनैः ३५४. सति मलमासे त्रयोदशभिर्मासैः चान्द्रो वत्सरः । चान्द्रस्यैव प्रभवो विभव इत्यादयष्षष्टिसंज्ञाः । एतत् सौरबार्हस्पत्येष्वप्यारम्भभेदेन समान इति भाति ।

End:

वारविषयम्—

अर्के क्लेशमनर्थकं च गमने सोमे च बन्धुप्रियम्
अङ्गारेऽनलतस्करज्वरभयं प्राप्तव्यमर्थं बुधे ।
क्षेमारोग्यमिदं करोति गुरुणा शुक्रे च लाभं स्थिरं
व्याधिर्बन्धनमर्थहानिरशुभं मन्दे दिने गच्छताम् ॥

No. 13517. कालनिर्णयग्रन्थः.
KĀLANIRṆAYAGRANTHAḤ.

Pages, 66. Lines, 4 on a page.

Begins on fol. 73*a* of the MS. described under No. 13446.

Incomplete.

Describes the evils which are likely to happen when rainbows, meteors, comets, etc., appear in the firmament and also when the Sun's halo becomes visible in different colours. Also states what ceremonies should not ordinarily be performed on these occasions.

Beginning :

रवौ युक्ते चतुर्भिस्तु राशिभिर्विश्वभागकैः ।
धूमोऽयं मण्डलाच्छुद्धो व्यतीपातस्स एव च ॥
एष षड्राशिभिर्युक्ते परिवेष इति स्मृतः ।
परिवेषेण हीना च मण्डलाज्जायते धनुः ॥

* * * *

एव पञ्चार्करूपाणि गुरूणां कीर्तितानि तु ।
सदा भ्रमति लोकेऽस्मिन् के(उ)त्पातश्च प्रकाशते ॥

End :

दम्पत्योर्द्वादशं लग्नं राशिर्वा यदि लग्नगः ।
अर्थहानिं सयोग्यस्मात्तदंशस्वामिनं त्यजेत् ॥
जन्मराश्यागमं नैव जन्मलग्नोदयं शुभम् ।
तयोरुपचयस्थानं यदि लग्नं गतं शुभम् ॥

No. 13518. कालनिर्णयः.
KĀLANIRṆAYAḤ.

Substance, palm-leaf. Size, $12\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 22. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Similar to the above. Deals with the following topics :—Ṛtukālaphala, Prayāṇakālaphala, Daśakālanirṇaya, Grāmacakra, Rātrighaṭikānirṇaya, etc.

Beginning :

ऋतुकालनिर्णयः ।

प्रतिपत्ति(दि)स्वयं पापी द्वितीये चाल्पभोगिनी ।
तृतीये धनसम्पत्तिः चतुर्थी वृषली भवेत् ॥

End :

चन्द्राष्टमं च धरणीसुतपञ्चमं च राहुर्नवं च शनिजन्मगुरुस्तृतीये ।
अर्कस्तु पञ्च भृगुरष्टमं च बुधश्चतुर्थे मानार्तिहानिमरणानि कथाक्रमेण॥

* * * *

चन्द्रताराबलम्—

मृगाश्विनीपुष्यपुनर्वसू च मैत्रानुराधश्रवणं च मूला ।
धनिष्ठरेवत्यगते प्रयाणे फलं रमेद्यति निवर्तयंच (?) ॥

No. 13519. कालप्रकाशिका.

KĀLAPRAKĀŚIKĀ.

Substance, Śrītāla. Size, 7⅞ × 1⅜ inches. Pages, 267. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 40 Adhyāyas.

Same work as that described under R. No. 740 of the Triennial Catalogue of MSS., Vol. I, Part I-C, but with additional stanzas in the beginning which are given below. The author Nṛsiṁha is here said to have been the son of Varadārya of Bhāradvājagōtrā and a resident of Pōlipākka also called Prauḍharāyapura. He was a disciple of Varadācārya and salutes Nṛsiṁhārya of Vādhūlagōtra as well as Samarapuṅgava who was a disciple of Kāntōpayantṛyōgin. The author states that he consulted Vāsiṣṭha, Kāladīpa, Kālādarśa, Paddhati, etc.

Beginning :

शुद्धस्फटिकसङ्काशं रत्नसिंहासने स्थितम् ।
पद्मया सहितं नित्यं नारायणमहं भजे ॥
गरुडध्वजसेनान्यं कलये चक्रधारिणम् ।
यद्ध्यानमात्रात् सन्त्रस्ताः प्रत्यूहा यन्ति दूरतः ॥
वाधूलवरदाचार्यपादपङ्कजमाश्रये ।
यदाश्रितानां भुक्तिश्च मुक्तिश्च सुलभा भवेत् ॥
वन्दामहे नृसिं(हार्यं) वाधूलान्वयनायकम् ।
कान्तोपयन्तृयोगीन्द्रकरुणापात्रतां गतम् ॥
पदवाक्यप्रमाणज्ञं वन्दे समरपुङ्गवम् ॥
कृतार्थाः प्राणिनस्सर्वे यस्यावतरणाद्भुवि ।
पोळिपाक्क इति ख्याते प्रौढरायपुरे वसन् ॥

आभिजात्येन वृत्तेन विद्यया चातिशायिनः ।
पुत्रोऽहं वरदार्यस्य भारद्वाजकुलोद्भवः ॥
श्रीनृसिंह इति ख्यातो ज्योतिश्शास्त्राब्धितारकः ।
प्रवीणानि विधानानि सम्यग्वीक्ष्य समन्ततः ॥
सङ्क्षिप्य तेषु सारोऽयं वक्ष्ये कालप्रकाशिकाम् ।
असूयामत्सरग्रस्ता वर्तन्ते भुवि मानवाः ॥
मत्प्रणीतं कथङ्कारमङ्गीकुर्वन्तु सङ्ग्रहम् ।
को भवेन्मत्सरी लो(के) सर्वेषां प्रियवादिनि ॥

End:

एवं सङ्क्षेपतः प्रोक्ता मया कालप्रकाशिका ।
वासिष्ठं कालदीपं च कालादर्शं च पद्धतिम् ॥
नारदीयं तथात्रेयं बार्हस्पत्यं तथैव च ।
अन्यान्यपि विधानानि समालोच्य समन्ततः ।
तेषु सारांशमुद्धृत्य कृता कालप्रकाशिका ॥
ज्योतिश्शास्त्रपयोऽम्भोधिं प्रमथ्य नवनीतकम् ।
नृसिंहविदुषा सम्यगुद्धृतस्सारसङ्ग्रहः ॥
जातके वा समर्थोऽस्तु गणिते वा तथाविधः ।
नृसिंहविदुषा तुल्यो विधाने नैव दृश्यते ॥

* * * *

मन्थानेन निमथ्य भावुकनिजज्ञानेन सम्यक्करां
ज्योतिश्शास्त्रसमुद्र . . फणिना तत्सर्वसारामृतम् ।
भूमीनिर्जरजीवनाय वरदाचार्यौरसेनामुना
भारद्वाजकुलीनमर्त्यहरिणा विद्वद्वरेणोद्धृतम् ॥
ये ग्रन्था प्राक्तनैः प्रोक्तास्सूरिभिर्ज्यौतिषे पुरा ।
नृसिंहसूरिरचितप्रबन्धेन न ते समाः ॥
कालप्रकाशिकामेनां नृसिंहविदुषा कृताम् ।
ये पठन्ति द्विजास्ते स्युस्सर्वलोकेषु विश्रुताः ॥

Colophon:

इति श्रीनृसिंहसूरिविरचितायां कालप्रकाशिकायां चत्वारिंशोऽध्यायः ॥

No. 13520. कालप्रकाशिका.

KĀLAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 132. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Same work as the above.

No. 13521. कालप्रकाशिका.

KĀLAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 48. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Breaks off in the 17th Adhyāya.

Same work as the above.

No. 13522. कालप्रकाशिका.

KĀLAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 16¼ × 1⅛ inches. Pages, 89. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 39*a*. The other work herein is Phaladīpika 1*a*.

Breaks off in the 22nd Adhyāya.

Same work as the above.

No. 13523. कालप्रकाशिका.

KĀLAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 17⅝ × 1 inches. Pages, 56. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

In the beginning seven leaves are lost.

Begins on fol. 1*a*. The other work herein is Gōpālaratnākara 29*a*.

Contains from the 3rd to the 23rd Adhyāya (incomplete).

Same work as the above.

No. 13524. कालप्रकाशिका.

KĀLAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 19¾ × 1⅝ inches. Pages, 116. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the 29th Adhyāya.

Same work as the above.

No. 13525. कालप्रकाशिका.
KĀLAPRAKĀŚIKĀ.

Substance, palm-leaf. **Size**, 16⅞ × 1¼ inches. **Pages**, 60. **Lines**, 6 on a page. **Character**, Telugu. **Condition**, slightly injured. **Appearance**, old.

Contains 1 to 15 Adhyāyas complete.

Same work as the above.

No. 13526. कालप्रकाशिका.
KĀLAPRAKĀŚIKĀ.

Substance, Śrītāla. **Size**, 18⅝ × 2 inches. **Pages**, 44. **Lines**, 11 on a page. **Character**, Grantha. **Condition**, slightly injured. **Appearance**, old.

Begins on fol. 20*a*. The other work herein is Nānārtharatnamālā 1*a*.

Contains from the beginning of the 11th Adhyāya to the 31st Adhyāya and breaks off in the 32nd Adhyāya.

Same work as the above.

No. 13527. कालप्रकाशिका.
KĀLAPRAKĀŚIKĀ.

Substance, palm-leaf. **Size**, 8¾ × 1⅜ inches. **Pages**, 194. **Lines**, 9 on a page. **Character**, Grantha. **Condition**, injured. **Appearance**, old.

The first leaf is lost. Breaks off in the 32nd Adhyāya.

Same work as the above.

No. 13528. कालप्रकाशिका.
KĀLAPRAKĀŚIKĀ.

Substance, palm-leaf. **Size**, 13¼ × 1⅜ inches. **Pages**, 88. **Lines**, 7 on a page. **Character**, Grantha. **Condition**, slightly injured. **Appearance**, old.

Twenty one leaves in the beginning are lost and hence the work commences in the course of the 13th Adhyāya and ends with the 22nd.

Same work as the above.

No. 13529. कालप्रकाशिका.
KĀLAPRAKĀŚIKĀ.

Pages, 20. **Lines**, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 13425.

Contains the Adhyāyas three, four complete and the fifth incomplete.

Same work as the above.

No. 13530. कालप्रकाशिका.
KĀLAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 11⅜ × 1¼ **inches. Pages,** 20. **Lines,** 6 **on a page. Character,** Grantha. **Condition,** slightly injured. **Appearance,** old.

Begins on fol. 14*a*. The other works herein are Dvādaśakūṭa 1*a*, Dōṣāpavāda 7*a*, Daśāphala 24*a*, Kālavidhānapaddhati 30*a*.

Wants the beginning and the end.

Same work as the above.

No. 13531. कालविधानपद्धतिः, द्राविडटीकासहिता.
KĀLAVIDHĀNAPADDHATIḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, 11⅜ × 1¼ **inches. Pages,** 340. **Lines,** 8 **on a page. Character,** Grantha and Tamil. **Condition,** slightly injured. **Appearance,** old

Begins on fol. 1*a*. The other work herein is Aṇḍalakṣaṇa 271*a* (Tamil).

Complete in 786 stanzas.

Same text as that described under R. No. 1594 of the Triennial Catalogue of MSS., Vol. II, Part I-C. Two additional stanzas are found in the beginning according to which the author is Vīrarāghavasūri of Vāsiṣṭhagōtra and Vaikhānasasūtra.

Date of copying: Saturday, the 24th of the Paṅguni in the year Rākṣasa. The former owner of the MS. is said to be Rudrakōṭi.

Beginning:

वैखानसकुलाग्रेण वीरराघवसूरिणा ।
ज्यौतिषं शास्त्रनाम्नाथ रचिता(तं) विदुषार्थिता(तम्) ॥
वैखानसवरिष्ठोऽसौ वासिष्ठो वीरराघवः ।
प्रयोगं ज्यौतिषं व्यक्तं कृतवान् प्रति(भा)समम् ॥

End:

एके मासे द्वौ तिथी चेत् परा स्यात् पूर्वस्तस्मिन् सूर्यसङ्क्रान्तिजुष्टे ।
द्वावप्येवं संयुते चेत् परा स्यात् सर्वश्चैवं चन्द्रसूर्योपरागे ॥

* * * *

सायन्तन्यपरत्र चेन्मृततिथिस्सैवाब्दिके मासिके
ग्राह्या स्यादपराह्णयोर्यदि तदा यात्राधि(का) सा मता ।

तुल्या चेदुभयापराह्णसमये पूर्वं न चेत् तद्द्वयोः
पूर्वेव त्रिमुहूर्तगास्तसमये नो चेत्परैवाविं(द)ता ॥

No. 13532. कालविधानपद्धतिः, द्राविडटीकासहिता.
KĀLAVIDHĀNAPADDHATIḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 96. Lines, 5 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

Contains stanzas 1 to 96.

Same work as the above.

No. 13533. कालविधानपद्धतिः, द्राविडटीकासहिता.
KĀLAVIDHĀNAPADDHATIḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, 17 × 1⅛ inches. Pages, 102. Lines, 7 on a page. Character, Grantha and Tamil. Condition, slightly injured. Appearance, old.

Incomplete.

Same work as the above.

No. 13534. कालविधानपद्धतिः, द्राविडटीकासहिता.
KĀLAVIDHĀNAPADDHATIḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, 14⅜ × 1⅜ inches. Pages, 116. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 68*a*. The other works herein are Lampāka 1*a*, Dvādaśabhāva 44*a*, Lagnanighaṇṭu 55*a*, Nakṣatranighaṇṭu 56*a*, Rāśinighaṇṭu 57*a* and 59*a*, Sthānanighaṇṭu 59*a*, Jyautiṣaviṣaya 59*a*.

Complete.

Same work as the above. In the following stanza the work is called Kālaprakāśika by the scribe.

नलाब्दे वृषभे मासे कृष्णपक्षेऽर्कवासरे ।
कालप्रकाशिका षष्ठ्यां वेङ्कटेशेन लिख्यते ॥

No. 13535. कालविधानपद्धतिः, आन्ध्रटीकासहिता.
KĀLAVIDHĀNAPADDHATIḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 17½ × 1⅜ inches. Pages, 60. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants the beginning and the end.

Same work as the above.

No. 13536. कालविधानपद्धतिः.
KĀLAVIDHĀNAPADDHATIḤ.

Substance, palm-leaf. Size, 15⅛ × 1⅜ inches. Pages, 17. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Contains 117 stanzas.

Same work as the above. According to the following concluding stanzas, the work consists of 110 stanzas.

End:

गुरौ लग्ने भानौ वियति हिबुके वा मदगृहे
शशाङ्के योगोऽयं भवति भुवनानन्दजनकः ।
धनं धान्यं वाजीगजतुरगदासाद्यमपि वा
महीतुं यच्चान्यत्कृतमखिलसिद्धिं जनयति ॥
वराहमाहात्म्यविदा मनीषिणा महार्थसन्दर्भवता मनोरमा ।
दशाधिकश्लोकशतेन निर्मिता समाप्यते कालविधानपद्धतिः ॥

No. 13537. कालविधानपद्धतिः.
KĀLAVIDHĀNAPADDHATIḤ.

Pages, 23. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 13530.

Breaks off in the 57th stanza.

Same work as the above.

No. 13538. कालविधानपद्धतिः.
KĀLAVIDHĀNAPADDHATIḤ.

Substance, palm-leaf. Size, 15⅞ × 1¼ inches. Pages, 24. Lines, 6 on a page, Character, Grantha. Condition, good. Appearance, new.

Contains 1 to 103 stanzas.

Same work as the above.

No. 13539. कालविधानपद्धतिः.
KĀLAVIDHĀNAPADDHATIḤ.

Pages, 72. Lines, 4 on a page.

Begins on fol. 26*a* of the MS. described under No. 13146.

Incomplete.

Same work as the above.

No. 13540. कालविधानपद्धतिः.
KĀLAVIDHĀNAPADDHATIḤ.

Substance, palm-leaf. Size, 12½ × 1¼ inches. Pages, 32. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 20*a*. The other works herein are Jyautiṣagrantha 1*a* and 36*a*, Dvādaśakūṭavivaraṇa 11*b*, Gārgyasaṁhitā 64*a*, Muhūrtagrantha 93*a*.

Incomplete.

Same work as the above.

No. 13541. कालविधानपद्धतिः.
KĀLAVIDHĀNAPADDHATIḤ.

Pages, 27. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 13420.

Incomplete.

Same work as the above.

No. 13542. कालविधानपद्धतिः.
KĀLAVIDHĀNAPADDHATIḤ.

Pages, 14. Lines, 10 on a page.

Begins on fol. 76*a* of the MS. described under No. 1512.

Contains 70 stanzas.

Same work as the above.

No. 13543. कालविधानपद्धतिः, सव्याख्या.
KĀLAVIDHĀNAPADDHATIḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅝ × 1⅜ inches. Pages, 20. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vāmanakārikā 11*a*, Gaṇitasārasaṅgraha (Kanarese) 26*a*.

Incomplete.

Same work as that described under R. No. 1418 of the Triennial Catalogue of MSS., Vol. II, Part I-B.

No. 13544. कालामृतम्.
KĀLĀMṚTAM.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 73. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Same work as that described under R. No. 741 of the Triennial Catalogue of MSS., Vol. I, Part I-C.

No. 13545. कालामृतम्.
KĀLĀMṚTAM.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 76. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Kālāmṛtavyākhyā 39*a*, Dvādaśabhāvādiphala 57*a*, Nakṣatranighaṇṭu 73*a*.

Incomplete.

Same work as the above.

No. 13546. कालामृतम्, आन्ध्रटीकासहितम्.
KĀLĀMṚTAM WITH TELUGU MEANING.

Substance, Śrītāla (palm-leaf). Size, $9\frac{5}{8} \times 2\frac{1}{4}$ inches. Pages, 97. Lines, 12 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Gāyatrīhṛdaya 40*a*.

Wants the beginning and the end.

Same work as the above.

Date of transcription: Wednesday, the 12th day of the bright fortnight of the Jyēṣṭha month in the year Pramāti.

No. 13547. कालामृतम्.
KĀLĀMṚTAM.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 42. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance old.

Begins on fol. 20*a*. The other work herein is Ṣaṭpañcāśikā 1*a*.

Wants the beginning and the end.

Same work as the above.

No. 13548. कालामृतम्.
KĀLĀMṚTAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 24*a* of the MS. described under No. 11674.
Incomplete.
Same work as the above.

No. 13549. कालामृतम्, सव्याख्यानम्.
KĀLĀMṚTAM WITH COMMENTARY.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 298. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Incomplete. Breaks off in the Bījāvāpatithivāra.

Same work as that described under R. No. 917 of the Triennial Catalogue of MSS., Vol II, Part I-A, but without the introductory stanzas.

No. 13550. कालामृतम्, सव्याख्यानम्.
KĀLĀMṚTAM WITH COMMENTARY.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 84. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Wants the beginning and the end.
Same work as the above

No. 13551. कालामृतम्, सव्याख्यानम्.
KĀLĀMṚTAM WITH COMMENTARY.

Substance, palm-leaf. Size, $17 \times 1\frac{1}{2}$ inches. Pages, 33. Lines, 8 on a page. Character, Grantha. Condition, good but the left ends are somewhat injured. Appearance, new.

Incomplete.
Same work as the above.

No. 13552. कालामृतव्याख्या.
KĀLĀMṚTAVYĀKHYĀ.

Pages, 84. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 13545.
Wants the beginning and the end.
Same commentary as that described above.

No. 13553. गार्ग्यसंहिता.

GĀRGYASAMHITĀ.

Pages, 59. Lines, 5 on a page.

Begins on fol. 64*a* of the MS. described under No. 13540.

Incomplete.

An astrological treatise dealing with the following topics :—

१. तिथिप्रकरण.	७. नक्षत्रादिगण्डान्त.
२. वारप्रकरण.	८. वस्त्रधारण.
३. नक्षत्रप्रकरण.	९. विवाहविधिः.
४. योगप्रकरण.	१०. पृच्छकलग्न.
५. करणप्रकरण.	११. लग्नादिफल.
६. अमृतादियोगप्रकरण.	१२. ग्रहफल.

Beginning :

प्रणम्य शिरसा नित्यं देवदेवं जिनेश्वरम् ।
यथार्थं संप्रवक्ष्यामि पञ्चाङ्गफलमुत्तमम् ॥
विवाहं मङ्गलं चैव स्थावराणि व्रतानि च ।
पुरग्रामप्रवेशं च प्रासाद(:) प्रतिपत्तिथौ ॥
शान्तिकं पौष्टिकं चैव स्थिरकर्मादिकल्पनम् ।
मन्त्रमौषधशिल्पं च द्वितीयायां तु कारयेत् ॥

* * * *

Colophon :

इति गार्ग्यसंहितायां करणप्रकरणम् ॥

End :

अष्टमे धनसौभाग्यं तुष्टिदस्सूर्यनन्दनः ।
पित्रोः प्रवाससहितं करोति नवमेऽर्कजः ॥
कन्यां करोति दशमे पापशीलोऽल्पवित्तताम् ।
एकादशे धनायुष्यं पुत्रसंपत्करश्शनिः ॥
मज्जाक्रियां द्वादशावे (?) कुरुते द्वादशार्कजः॥

No. 13554. गौरीपञ्चाङ्गम्.

GAURĪPAÑCĀṄGAM.

Substance, palm-leaf. Size, 8½ × 1¼ inches. Pages, 3. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Herein the day as well as the night is divided into eight periods of 1½ hours' duration and the nature of the auspiciousness or inauspiciousness of each period is indicated.

Beginning :

न तिथिर्न च नक्षत्रं न ग्रहो न च चन्द्रमाः ।
मर्त्येयोगप्रमाणे (?) च कार्यसिद्धिर्भविष्यति ॥

आदिवारम् दिवम्(1)—

उद्योगम् १, रोगम् २, कलहम् ३, अमृतम् ४, शुभम् ५, तामसम् ६, चोरः ७, रोगम् ८.

रात्रि—

शुभम् १, अमृतम् २, रोगम् ३, लाभम् ४, कलहम् ५, शुभम् ६, अमृतम् ७, रोगम् ८.

End :

शनिवारम् दिवा—

कलहम् १, शुभम् २, रोगम् ३, उद्योगम् ४, अमृतम् ५, लाभम् ६, धनम् ७, लाभम् ८.

रात्रि—

रोगम् १, उद्योगम् २, शुभम् ३, धनम् ४, रोगम् ५, स्थिरम् ६, लाभम् ७, चोरः ८.

गौरिपञ्चाङ्गं सत्यम् ॥

Colophon :

गौरीपञ्चाङ्गं सम्पूर्णम् ॥

No. **13555.** गौरीपञ्चाङ्गम्, आन्ध्रटीकासहितम्.

GAURĪPAÑCĀṄGAM WITH TELUGU NOTES.

Substance, palm-leaf. Size, 11½ × 1½ inches. Pages, 10. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

ग्रन्थान्तरे पञ्चवर्षात् द्वाविंशाब्दात्परं व्यथा ।
पश्चाद्भाग्यमिति प्राहुरंशादौ योगजातके ॥

End:

व्ययाधिपान्तरे काले क्रूरवेधग्रहान्तरे ।
देहालस्यं मनस्तापं कार्यविघ्नं महद्भयम् ॥

त्रयस्त्रिंशत्फलं सत्यं राजान्तरवशात् सुखम् ।
प्राधान्यायोगकालस्याप्त्ररांशे नात्र संशयः ॥

No. 13666. जातककर्मपद्धतिः.

JĀTAKAKARMAPADDHATIḤ.

Substance, palm-leaf. Size, 14⅝ × 1⅝ inches. Pages, 4. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, new

Incomplete; contains the following two Adhyāyas:—

१. भावसाधनाध्याय. २. दृष्टिसाधनाध्याय.

Same work as that described under R. No. 374(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-B. By Śrīpatibhaṭṭa.

No. 13667. जातककर्मपद्धतिः, सव्याख्या.

JĀTAKAKARMAPADDHATIḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 120. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the eighth Adhyāya.

Same text as the above with a commentary by Sūryadēva which commentary is the same as that described under R. No. 1087 of the Triennial Catalogue of MSS., Vol. II, Part I-A, wherein see for the beginning.

End:

इति सूर्यदेवसोमसुद्विरचिते श्रीपतिपद्धतिव्याख्याने जातकालङ्कारे दशान्तर्दशाध्यायस्सप्तमः ॥

अथ प्रकीर्णकाध्यायो व्याख्यायते—

* * * *

अथ राजयोगग्रहैर्योगवशाच्छुभाशुभफलानुभवं श्लोकेनाह—

मू ॥ यो(ये) राजयोगाः कथितं(ताः) . . तेषां
भागो न चेत्स्यात्सफलास्तदा ते ।
ज्ञेयो बुधैर्योगजवीर्ययोगा-
द्युगा (ग्गा) मिनां रश्मिफलानि तद्वत् ॥

व्या ॥ बृहज्जातकादिजातकशास्त्रेषु ये राजयोगाः कथिताः, तेषां राजयोग-भङ्गयोगाध्यायोक्तम् ॥

No. 13668. जातककर्मपद्धतिव्याख्या—बालप्रबोधिनी.
JĀTAKAKARMAPADDHATIVYĀKHYĀ :
BĀLAPRABŌDHINĪ.

Pages, 34. Lines, 20 on a page.

Begins on fol. 22*a* of the MS. described under No. 13447.
Incomplete.

A brief commentary on the Jātakakarmapaddhati, described above. The commentator's name is given as Paṭaśrēṇi, who salutes one Gōvinda of Kailāsapura.

Beginning :

व्याघ्रग्रामेशनेत्राण्यरुणशशधराङ्गारकैः कल्पितानी-
त्येतत्सौम्यं कृतेस्तेऽखिलभुवनगुरोर्भार्गवाचार्यवृत्तेः ।
उद्यन्मन्दस्मितस्य प्रकटितभुजगालङ्कृतेर्देव भद्रं
तुभ्यं सर्वग्रहात्मन् वरद पर नमः पार्वतीवल्लभाय ॥
विद्यादाख्यं व्यविद्यादं चित्रज्योतिर्जगद्गुरुम् ।
कैलासपुरगेहस्थं वन्दे गोविन्दनामकम् ॥
पटश्रेणीति लोकेषु प्रसिद्धस्य द्विजन्मनः ।
कृतेर्विलिख्यते व्याख्या स्वल्पा जातकपद्धतेः ॥
बालप्रबोधिनीसंज्ञां सन्तस्संशोधयन्त्विमाम् ।
यद्यप्युपकृतिः स्वल्पाप्यनया विनयान्विता ॥
ज्ञेयोऽत्र प्रथमं हि जन्मसमयश्छायाम्बुचन्द्रस्फुटं
तत्कालप्रभवा विलग्नसहिताः कार्याः स्फुटाश्च ग्रहाः ।
सिद्धान्तोक्तपरिस्फुटोपकरणैस्ते चासकृत्कर्मणा
भावाः खेटदशो बलानि च ततस्तेषां विचिन्त्यानि षट् ॥

इत्युक्तिमनुसरन् प्रथमं भावानयनप्रकारमाह—

कुर्यात् सायनलग्नतश्चरकला प्राणान्तरे तत्कृतात्
लग्नान् वा सकलान्तरं त्रयमपि स्वर्णं दिशंवेद्युवे (?) ।
त्र्यंशोनं च तदन्तिके तनुमदे नान्येषु तत्त्र्यंशकं
भावास्स्युर्ग्रहजास्तु ते स्फुटसमा सन्धिद्वये . . . ॥

. . . . सायनलग्नत इत्यनेन द्वितीयादिभावानयनस्योक्तत्वात् तस्य च लग्नमन्तरेणाशक्यत्वात्तदानयनप्रकारः किंचिदुच्यते ।

End:

किञ्च स्वेशफलोत्कराभ्यामित्यनेनैकस्य षष्टकोष्ठफलानि निहन्तुमन्येषामिष्टकष्टानामपेक्षितत्वात् . सप्तसु कोष्ठद्वयपङ्क्तिषु सर्वेषां ग्रहाणामिष्टकोष्ठफलानि प्रक्षिप्यैवैकस्येष्टकोष्ठफले गुणितुं शक्ये इति द्योत्यते । शास्त्रान्तरे भूषादेवादिसमुच्चयाप्येतदानयनप्रकारोऽपि द्रष्टव्यः ॥

No. 13669. जातककलानिधिः.

JĀTAKAKALĀNIDHIḤ.

Substance, palm-leaf. Size, 10½ × 1⅜ inches. Pages, 52. Lines, 6 on a page. Character, Kanarese. Condition, good. Appearance, new.

Breaks off in the third Kalāvilāsa.

Same work as that described under R. No. 1091 (*c*) of the Triennial Catalogue of MSS., Vol. II, and with introductory stanzas in the beginning and with differences in the colophon. The topics dealt with herein are enumerated in the introductory stanzas. The names of chapters are named Kalāvilāsas instead of as Adhyāyas.

Beginning:

ज्योतिःप्रकारनाथाय प्रतिभाभासुरात्मने ।
बहिरन्तस्तमोहन्त्रे मिहिराय नमो नमः ॥
यस्य(ा)लोकेन लोकानामदृष्टार्थोऽवगम्यते ।
मया प्रकाश्यते पूर्णस्स जातककालनिधिः ॥
शास्त्रसङ्केतकथनं ग्रहभाववलक्रमः ।
बलानां भ (फ)लभेदाश्च शुभजातकसूचकम् ॥
दशाक्रमपरिज्ञानं सूतिकालस्य लक्षणम् ।
बालारिष्टादिबोधश्च गण्डकालविवेचनम् ॥
पुत्राश्चिरायुर्योगाश्च राजयोगाश्च साहसाः ।
दशाफलान्यष्टवर्गफलं स्त्रीजातकं तथा ॥
गर्भादिमप्रश्नफलं सिद्धांश्च ग्रहसाधनम् ।
अत्रैशायोदशकलां स्वरं तु सुदृशां मुदे ॥
अश्विन्यादिमताराणां पदान्यष्टोत्तरं शतम् ।
नवभिर्नवभिः पादैः क्रमान्मेषादिराशयः ॥

Colophon:

इति जातककलानिधौ सङ्केतमूर्तिभावो नाम प्रथमकलाविलासः ।
इति जातककलानिधौ धनस्थाननिरूपणं नाम द्वितीयकलाविलासः ॥

End:

अथ भ्रातृस्थानचिन्ता--

तृतीयं भगिनी भ्रातृ कनिष्ठं भृत्य एव च ।
दासो गर्वस्तथा शुक्तिदुश्चिनं च सुखोत्तरम् ॥

* * * *

लग्नलग्नाधिपत्योस्सहजकारकस्यादौ सहजसिद्धिः ॥

लग्नेशश्चेत्कुजः प्राणी स्वोऽर्थौ जीवेत्स्वतः परम् । स सोर्थचरस्साधयति । सोर्थमसि तपश्चरत् । भ्रातृस्थानं तृतीयं च नवैकादश

No. **13670.** जातककलानिधिः.
JĀTAKAKALĀNIDHIḤ.

Pages, 52. Lines, 22 on a page.

Begins on fol. 159*a* of the MS. described under No. 13263.

Contains 1 to 4 Kalāvilāsas complete and the 5th incomplete and 1 to 3 Vilāsas again in duplicate. A few portions of the 4th Adhyāya of the Yōgārṇava are found to be mixed up in the course of Vilāsas 1 to 2.

Same work as the above, with a different first stanza as given below.

Beginning:

कामेश्वरान्तमध्यस्थां करुणामयविग्रहाम् ।
कामाक्षीं प्रणमाम्यम्बां कलाधरकलाधराम् ॥

No. **13671.** जातककलानिधिः.
JĀTAKAKALĀNIDHIḤ.

Substance, palm-leaf. Size, 15⅝ × 1⅜ inches. Pages, 30. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains 1 to 7 Kalāvilāsas complete.

Same work as the above, without the first stanza given therein.

No. **13672.** जातककलानिधिः.
JĀTAKAKALĀNIDHIḤ.

Pages, 21. Lines, 9 on a page.

Begins on fol. 85*a* of the MS. described under No. 13613.

Contains the Adhyāyas 1 to 10. Stanzas on the same subject from another astrological work are added and are concluded with the following colophon.

Colophon :

इति कलानिधिः समाप्ता ॥

No. 13673. जातकचन्द्रिका.
JĀTAKACANDRIKĀ.

Substance, palm-leaf. Size, 12¼ × 1¼ inches. Pages, 8. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 37*a*. The other works herein are Jaiminisūtravṛtti, Jyōtiḥpradīpikā 1*a*, Lampāka 18*a*, Jaiminisūtravyākhyā : Jātakasārasaṅgraha 41*a*.

Complete in five Adhyāyas.

Same work as that described under R. No. 374 (*c*) of the Triennial Catalogue of MSS., Vol. I, Part I-B. The authorship is attributed to Vēṅkaṭēśārya, son of Yajñanārāyaṇa, in the colophons found in certain copies described below.

No. 13674. जातकचन्द्रिका.
JĀTAKACANDRIKĀ.

Pages, 37. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 13560.

Complete.

Same work as the above.

No. 13675. जातकचन्द्रिका.
JĀTAKACANDRIKĀ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 5*a* of the MS. described under No. 13574.

Complete in the five following Adhyāyas :—

१. आधिपत्यनिरूपण.	४. आयुर्ज्ञानाध्याय.
२. राजयोगाध्याय.	५. लग्नफलनिरूपण.
३. दशान्तर्दशालक्षण.	

Same work as the above, but some stanzas are found in disorder. Date of transcription : 14th day of the dark fortnight of the Caitra month in the year Bhava. Name of the scribe ; Cinta Kuppusvāmi, son of Umāmahēśvaran of Brahmadēśa.

Colophon :

ಯಿದು ಶ್ರೀಮಜ್ಜಿನೇಂದ್ರ ಭಕ್ತಿನಿಷ್ಠನ್ಪ್ರಜ್ಞಾನಚಂದ್ರಿಕಾಸಾಂದ್ರದಹರಕು ಹರ ದೇವಾರ್ಯನಿಂ ಕನ್ನಡವಾತಿನೊಳ್ ವಿರಚಿಸಪಟ್ಟ ಜಾತಕ ಚಂದ್ರಿಕಾ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಫಲಮಂ ಪೇಳ್ವುದು ಅಧ್ಯಾಯಃ ॥

No. 13676. जातकचन्द्रिका.
JĀTAKACANDRIKĀ.

Pages, 6. Lines, 6 on a page.

Begins on fol. *2a* of the MS. described under No. 13606.

Complete.

Same work as the above, but with the colophon :—

यज्ञनारायणाभिख्ययायजूकतनूभुवा ।
श्रीवेङ्कटेश्वरार्येण कृता जातकचन्द्रिका ॥

No. 13677. जातकचन्द्रिका.
JĀTAKACANDRIKĀ.

Substance, palm leaf (Śrītāla). Size, 10¼ × 1½ inches. Pages, 6. Lines, 7 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. *81a*. The other works herein are Lampāka *1a*, Jātakayōgāvalī *25a*, Jātakayōgārṇava *36a*, Ṣaṭpañcāśadhōrā *60a*, Jātakalagnaphala (with Kanarese meaning) *76a*, Jinēndramālā *83a*.

Incomplete.

Same work as the above.

No. 13678. जातकचन्द्रिका.
JĀTAKACANDRIKĀ.

Substance, palm-leaf. Size, 13⅝ × 1½ inches. Pages, 11. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. *21a*. The other works herein are Bhāvadarpaṇa (Vāñchānāthīya) *1a*, Jyautiṣaviṣaya (Telugu) *16b*.

Complete.

Same work as the above.

The name of the copyist : Majēṭi Sarvēśaliṅga. Date of transcription : Friday, the 13th day of the dark fortnight of the Phālguna month in the year Bhava.

Colophon :

इति पूर्वपाराशरी उत्तरपाराशरी सम्पूर्णा ॥

No. 13679. जातकचन्द्रिका, आन्ध्रटीकासहिता.

JĀTAKACANDRIKĀ WITH TELUGU MEANING.

Pages, 26. Lines, 6 on a page.

Begins on fol. 36*a* of the MS. described under No. 13623.

Complete.

Same work as the above and with Telugu meaning.

End:

मू ॥ प्रतिलग्नसमालक्ष्या पूर्वदृष्टिविरोधतः ।
तत्तद्गृहस्वरूपाणि क्रमेणैव विवृण्महे ॥

टी ॥ . . . . ॥

मू ॥ केन्द्रत्रिकोणगे सौम्याः पापा भावाधिकारकाः ।
लग्नाधिपे बलयुते नृपतुल्यो भवेन्नरः ॥
लग्ने स्थिता मित्रकलत्रनाथाः सशत्रुनाथा यदि पापसंयुजाः ।
तथा परस्त्रीषु रतः कुमार्गी शुभेक्षितश्च . . तथा शुभाः स्युः ॥

Colophon:

इति जातकचन्द्रिका सम्पूर्णम् (र्णा) ॥

No. 13680. जातकचन्द्रिका, आन्ध्रटीकासहिता.

JĀTAKACANDRIKĀ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 17½ × 1⅜ inches. Pages, 8. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 10*a*. The other works herein are Lampāka 1*a*, Lampākasāra 14*a*.

Complete.

Same work as the above.

The scribe gives his name and the date of the MS.—

कालयुक्तचामूर्जेकृष्णे नवम्यां सोमवासरे ।
रामनाथेन लिंखितमिदं ग्रन्थं समाप्ति(पि)तम् ॥

No. 13681. जातकचन्द्रिका, आन्ध्रटीकासहिता.

JĀTAKACANDRIKĀ WITH TELUGU MEANING.

Pages, 8. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13574.

Incomplete.

Same work as the above.

No. 13682. जातकचन्द्रिका, सव्याख्या.
JĀTAKACANDRIKĀ WITH COMMENTARY.

Pages, 28. Lines, 8 on a page.

Begins on fol. 12*a* of the MS. described under No. 10680.

Complete.

Same text as the above with a colophon which attributes the authorship to Vēṅkaṭēśārya and with a commentray. The commentator's name is not given.

Beginning:

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरमहं (रं महः) किञ्चिद्वीणाधरमुपास्महे ॥
फलानि नक्षत्रदशाप्रकारेण विवृण्महे ।
वयं पाराशरीं होरामनुसृत्य विवृण्महे (यथामति) ॥
बुधैर्भावादयस्सर्वे ज्ञेयास्सामान्यशास्त्रतः ।
एतच्छास्त्रानुसारेण संज्ञां ब्रूमो विशेषतः ॥

(व्या.) बुधैरिति । बुधैः भावादयः लग्नादिद्वादशभावाः आदिशब्देन दशाभुक्तिविभागाः केन्द्रत्रिकोणलक्षणादय उच्यन्ते । सामान्यशास्त्रेण—तदुक्तप्रकारेण ज्ञेयाः । वयमेतच्छास्त्रानुसारेण — वक्ष्यमाणशास्त्रानुगुण्येन । विशेषतस्संज्ञाम्—सङ्केतम् ; ब्रूमः ।

(मू.) पश्यन्तिं सप्तमान् सर्वे शनिजीवकुजाः पुनः ।
विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान् ॥

End:

(मू.) योगेषु केचिज्जायन्तां मूढकाश्मीरगर्दभाः ।
योगास्ते किं करिष्यन्ति स्वदशानामनागमे ॥

(व्या.) * * * * *

(मू.) पापिनश्चेद्ग्रहास्तेषामुच्चत्वे सति किं फलम् ? ।
बलवत्त्वे घातुकानां यत्फलं लभ्यते तु तत् ॥

(व्या.) पापिन इति । ग्रहा रव्यादयः पापिनो भवन्ति चेत्तेषामुच्चत्वे सति नराणां किं वा फलं भविष्यति ? घातुकानां बलवत्त्वे सति यत्फलमास्ति तत्फलं नरैर्लभ्यते । शुभाशुभानामेवं ग्रहाणामुच्चतारतम्येन स्वक्षेत्रत्वादिगुणाः नीचताशत्रुक्षेत्रादिदोषाश्च बलवत्त्वदौर्बल्ययोरेवं हेतुरिति भावः ॥

Colophon :

यज्ञनारायणाभिख्ययायजूकतनूभुवा ।
श्रीवेङ्कटेश्वरार्येण कृता जातकचन्द्रिका ॥
जातकचन्द्रिका संपूर्णा ॥

No. 13683. जातकचन्द्रिका, सव्याख्या.

JĀTAKACANDRIKĀ WITH COMMENTARY.

Pages, 30. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9537.

Contains the first 33 stanzas.

Same text and commentary as the above. The commentary on the first two stanzas is not found in the MS. described above whereas it is given here.

Beginning :

(मू.) सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरं महः किञ्चिद्वीणाधरमुपास्महे ॥

(व्या.) अथ तत्रभवान् प्रारिप्सितविघ्ननिवारणाय शिष्टाचारपरिप्राप्तविशिष्टेष्टदेवतोपासनरूपं मङ्गलमादौ शिष्यशिक्षार्थं निबध्नाति सिद्धान्तमिति । महः उपास्महे इति सम्बन्धः । महः कीदृग्विधम् ? किञ्चित्—अनिर्वाच्यम् । औपनिषदं सिद्धान्तम् उपनिषत्प्रतिपाद्यम् । तत्तात्पर्यविषयीभूतचिदात्मकमित्यर्थः । परमेष्ठिनः—ब्रह्मणः । शुद्धान्तम्—अन्तःपुरम् । कलत्रमिति यावत् । तत्सौन्दर्यं प्रकाशयति । शोणमधरमधरोष्ठं यस्य तत् । (ए)का(?)वयवमात्रसौष्ठवप्रतिपादनात् स्थायी(ली)पुलाकन्यायेन सर्वावयवसौष्ठवसिद्धेस्तावन्मात्रमेवोक्तम् । तच्चेष्टां प्रतिपादयति । वीणाधरम् । कच्छपीसंज्ञकवीणावादनशीलमित्यर्थः । "तुम्बुरोस्तु कलावती । नारदस्यापि महती सरस्वत्यास्तु कच्छपी ।" इत्यमरः ॥

(मू.) फलानि नक्षत्रदशाप्रकारेण विवृण्महे ।
वयं पाराशरीं होरामनुसृत्य यथामति ॥

(व्या) प्रारिप्सितविषयं प्रतिजानीते फलानीति । नक्षत्राणां कृत्तिकादीनां सम्बन्धिन्यो दशाः नक्षत्रदशाः तन्नियताः सूर्यादिग्रहदशा इत्यर्थः ।

End :

भुक्तिषु महादशानाथस्यैव फलप्रदत्वेऽपि स्वस्वभुक्तिकालेषु फलदानाद्भुक्तिनाथदशा वा भुक्तीनां फलदातृत्वव्यपदेशोऽस्तीति न काप्यनुपपत्तिः ॥

(मू.) शुभस्य स्ववियुक्तस्य दशायां योगकारकाः ।
स्वस्वभुक्तिषु यच्छन्ति कुत्रचिद्योगजं फलम् ॥

(व्या.) ननु योगकारकमहादशायामन्ये योगकारकाः स्वस्वभुक्तिषु यदि फलदानासमर्थास्तर्हि कुत्र फलं प्रयच्छन्तीत्याशङ्क्य स्वापेक्षया दुर्बे ।

No. 13684. जातकचन्द्रिका, सव्याख्या.

JĀTAKACANDRIKĀ WITH COMMENTARY.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 11. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Jātakaśirōmaṇi 6*b*, Dvādaśabhāva 18*a*.

Complete.

Same text and commentary as the above. At the end there are some stanzas relating to Yōgabhāva unconnected with the work.

तुलाकोदण्डमीनेषु लग्नस्थो यदि भानुजः ।
स भवेद्वसुधापालो निर्जितारातिमण्डलः ॥
सप्तमे त्रिदशस्वामिपुरोहितसमन्विते ।
तद्भावबुधसंयुक्ते गुरुद्रोही विनश्यति ॥
* * * *
शिरसा शासनं तस्य धारयन्ति नृपास्सदा ॥
त्रिकोणगे लाभगते अष्टमाधिपतौ यदि ।
तद्दशान्तर्दशावेदेह . . दां(?) विनिर्दिशेत् ॥

Colophon:

इति गोविन्ददीक्षितीयं समाप्तम् ॥

No. 13685. जातकचन्द्रिका, सव्याख्या.

JĀTAKACANDRIKĀ WITH COMMENTARY.

Pages, 24. Lines, 7 on a page.

Begins on fol. 27*a* of the MS. described under No. 13618.

Complete.

Same text and commentary as the above.

No. 13686. जातकचन्द्रिका, सव्याख्या.

JĀTAKACANDRIKĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 16. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Same text and commentary as the above, but with introductory stanzas in the beginning.

Beginning:

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरं महः किञ्चिद्वीणाधरमुपास्महे ॥
नक्षत्रजातकप्रकारेण विवृण्महे ।
इनशशिकुजराहुर्जीवमन्दज्ञकेतुः भृगुज इति नवानां कृत्तिकादिक्रमेण ।
तनुनयासिनजाया तोयधान्यासपीसा नरपतिविदुरन्द्रा भास्करादिक्रमेण ॥

कोटिलक्षणम्—

द्वे द्वे रेखे तिर्यगूर्ध्वं विदिक्ष्वेकैकमालिखेत् ।
पूर्वमारभ्य मेषादीन् लिखेत् कोटिं यथाक्रमम् ॥

No. 13687. जातकचन्द्रिकाव्याख्या.

JĀTAKACANDRIKĀVYĀKHYĀ.

Pages, 7. Lines, 8 on a page.

Begins on fol. 139*b*. of the MS. described under No. 13618.

Incomplete.

Contains the commentary only which is different from that described above.

Beginning:

नमस्ते सर्वभूतानां कारणाय महात्मने ।
व्यक्ताव्यक्तस्वरूपाय रघुनाथकतेजसे ॥
प्रणम्य दक्षिणामूर्तिं व्याख्यानं क्रियते मया ।
केरली(ले?) रचितस्यास्य जातकस्य सुदर्शनीम् ॥

तत्रादौ भगवान् ग्रन्थकार प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्त्यर्थ-मविगीतशिष्टाचारानुमितवेदबोधितकर्तव्यताकं विशिष्टेष्टदेवतोपासनात्मकं मङ्गलं कृत्वा शिष्यशिक्षायै तन्म लश्लोकं ग्रन्थादौ निबध्नाति सिद्धान्तमिति। औप-निषदमुपनिषत्प्रतिपादकं(द्यं) सिद्धान्तरूपं ब्रह्मस्वरूपमिति यावत् ।

* * * *

681-A

वयमेतच्छास्त्रानुरूपेन वक्ष्यमाणशास्त्रानुगुण्येन विशेषतः संज्ञां सङ्केतं ब्रूमः। पश्यन्तीति। सूर्योदयस्सर्वे सप्तमान् सप्तमराशिस्थान् पश्यन्ति। पुनः भूयः शनिजीवकुजाः विशेषतः। विशेषेण।

रविवारादिक्रमः——

End :

निजोच्चशुद्धः खचरो विशोध्यो भमण्डलात् षड्भ्व . . . . . ।
यथास्थितः षड्भ्वनाधिकश्चेत् कलीकृतस्सङ्गुणितो निजाब्दैः॥
तत्र खाभ्ररसचन्द्रलोचनैरुद्धृते सति यदाप्यते फलम्।
वर्षमासदिननाडिकादिकं तद्धि पिण्डभवमायुरुच्यते॥

No. 13688. जातकजीवनम्.
JĀTAKAJĪVANAM.

Substance, palm-leaf. Size, 16½ × 1⅛ inches. Pages, 14. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 81*a*. The other works herein are Jaiminisūtra 1*a*, Jyautiṣaviṣaya 13*b*, Jaiminisūtra with commentary 39*a*, Jātakasārasaṅgraha 49*a*.

Incomplete.

A minor treatise on horoscopy dealing with the good or evil likely to befall to a person from the relative position of the planets at the time (Lagna) of his birth.

Beginning :

वन्दे मन्दारमूलस्थं बृन्दारकनिषेवितम्।
कुन्देन्दुस्फटिकाकारं चन्द्रमौलिं शिवाप्तये॥
परस्परविरुद्धार्थज्योतिश्शास्त्रार्णवोदरे।
मज्जतामवलम्बाय वक्ष्ये जातकजीवनम्॥
चरात् स्थिरगताः खेटाः स्थिरादुभयगा ग्रहाः।
क्रमाद्भवन्ति बलिनो राशयोऽपि तथैव च॥
स्थिरराशिगताः खेटाश्चरांश्चरगताः स्थिरान्।
पश्यन्ति राशीनुभयानुभयक्षेत्रगा ग्रहान्॥

End :

लग्नाधिपतिभावेभ्यः सप्तमादिभ्य एव वा।
यस्य भावस्य केन्द्रेषु शुभास्तस्य शुभा दशा॥
लग्नात्सप्तम . . . . ।
. . . लग्नकेन्द्रस्थे तद्दशा हीयते क्वचित्।

एकहायनहानिस्स्यान्नीचानामसहायिनाम् ।
नीचानामसहायानामेकसंवत्सरक्षयः ॥
लग्नाना . . . . ।

No. 13689. जातकजीवनम्.
JĀTAKAJĪVANAM.

Pages, 3. Lines, 16 on a page.

Begins on fol. 47*b* of the MS. described under No. 13601, wherein this work has been omitted to be mentioned in the list of other works given therein.

Incomplete.

Same work as the above.

No. 13690. जातकजीवनव्याख्या.
JĀTAKAJĪVANAVYĀKHYĀ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 45*a* of the MS. described under No. 13601.

Contains up to the end of the Daśādhikāra.

A commentary on the work described above.

Beginning:

चरराशिस्थिता ग्रहाः स्थिरराशिग्रहान् पश्यन्ति, स्थिरराशिग्रहाः चरराशिग्रहान् पश्यन्ति । उभयराशिस्थिता उभयराशिस्थितान् पश्यन्ति । एवं ग्रहाणामन्योन्यवीक्षणं ज्ञातव्यम् ।

* * * *

अथ राजयोगादिनिर्णयार्थं समारूढमाह । लग्नादिति । लग्नापेक्षयेत्यर्थः । अपादाने पञ्चमी । लग्नाधिपतिर्यावद्राशिसंस्थः यावत्संख्याके राशौ तिष्ठति ततः तस्माल्लग्नाधिपाधिष्ठितराशेरित्यर्थः तावान् तावत्सङ्ख्याको राशिरारूढ इति ऋषिभिः कथितः ।

End:

अथ राशिदशाभुक्तिमाह—कृत्वेति । अ . . . द्वादशेत्यर्थः । यस्य राशेर्भुक्तिर्ज्ञातव्या स राशिरोजश्चेत् क्रमेण द्वादशानां राशीनां भुक्तिर्भवति । युग्मराशिश्चेद्युत्क्रमेण द्वादशानां राशीनां भुक्तिस्स्यादिति श्लोकार्थः ॥

Colophon:

इति दशाधिकारव्याख्यानं समाप्तम् ॥

No. 13691. जातकनिर्णयः.
JĀTAKANIRṆAYAḤ.

Pages, 12. Lines, 19 on a page.

Begins on fol. 108a of the MS. described under No. 5764. Incomplete.

On the preparation of a horoscope to a newly-born infant.

Beginning:

अतःपरं प्रवक्ष्यामि जातस्यैव शुभाशुभम् ।
जातमात्रे कुमारस्य जातकर्म विधीयते ॥
स्तन्य(स्य)पानतः पूर्वं नाभेः कृन्तनतः परम् ।
तिथिनक्षत्रवाराणां फलं नेच्छन्ति पण्डिताः ॥
एतेष्वेतेषु कालेषु शुभकाले तु कारयेत् ।
दर्शने शुभद. प्रोक्तः शुभयोगविशेषतः ॥

* * * *

लग्ने मातापितृसुतावर्केन्दुकुजकेतवः ।
रविसौरिकुजा घ्नन्ति द्वितीये मातरं तथा ॥

End:

मन्दांशे मृतपुत्रा स्याज्जीवे पुत्रार्थभोगिनी ।
दाशे कलांशुदुश्शीला शापदग्धा (?) जनप्रिया ॥

No. 13692. जातकपारिजातम्.
JĀTAKAPĀRIJĀTAM.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 170. Lines, 9 on a page. Character, Kanarese and Grantha. Condition, injured. Appearance, old.

Begins on fol. 8a. The other work herein is Jyautiṣaviṣaya 1a. Complete in 18 Adhyāyas.

Same work as that described under R. No. 1592 of the Triennial Catalogue of MSS., Vol. II, Part I-C. By Vaidyanātha, son of Vēṅkaṭādri. The following additional stanzas are found in the beginning. The concluding stanzas state the topics dealt with in the work.

Beginning:

शुक्लाम्बरधरं . . . शान्तये ॥
श्रीवेङ्कटाद्रिनिलयः कमलाकामुको महान् ।
अमङ्गरविभूतिस्ते कुरङ्गयति मङ्गलम् ॥

End:

भार्गवो नीचराशिस्थः स्वोच्चांशकसमन्वितः ।
स्वदाये कृषिवाणिज्यधनलाभं प्रयच्छति ॥

इति दशान्तर्दशाफलम् ।

सम्यक् बलिनः स्वतुङ्गभावे सम्पूर्णा बलवत्कृतस्य मुक्का(मुक्तौ) ।
नीचांशगतस्य शत्रुभागे ज्ञेयानिष्टफला दशाप्रसूतौ ॥
अष्टादशाध्यायिनी सर्वहोरासमुद्धृते जातकपारिजाते ।
राशिस्वरूपादिदशाफलान्तं प्रोक्तं मया भानुमुखप्रसादात् ॥

Colophon:

इति नवग्रहकृपया वैद्यनाथविरचितजातकपारिजाते अष्टादशोऽध्यायः ॥

शाखाभिरष्टादशसङ्ख्यकाभिस्स्वदायरूपाभिरतिप्रकाशा ।
ज्योतिर्मयस्सर्वफलप्रदानं सङ्कीर्तितो जातकपारिजातः ॥
उक्तं राशिगुणालयं ग्रहगतिं स्थानस्वभावाकृति-
श्रादानादिसमस्तजीव . . बालाद्यरिष्टाकरम् ।
आयुर्जातकभङ्गयोगविधि(त)ः श्रीराजयोगादिज-
. . दि योगजाशुभशुभं मान्द्यब्दजा च क्रमात् ॥
पश्चादष्टमवर्गबिन्दुगणितं होराधनस्तानजः
दुश्चिक्का . . निभावजं सुतरिपुस्थानप्रयुक्तं फलम् ।
कन्दर्पाष्टमधर्मराशिजनितं व्यापारलाभं त्यजन्
नारीजातकलक्षणं निगदितं चक्रादशान्तर्दशाः ॥
श्रीविद्याधिकवेङ्कटाद्रितनयः श्रीवैद्यनाथस्सुधी-
रादित्यादिसमस्तखेटकृपया विद्वज्जनप्रीतये ।
होरासिन्धुसमुद्गतामृतमयीं अष्टादशाध्यायिनीं
चक्रे जातकपारिजातसरणिं गीतोत्सक श्लोकिनी(?) ॥

इति श्रीजातकपारिजातं समाप्तम् ॥

No. 13693. जातकमञ्जरी.
JĀTAKAMAÑJARĪ.

Pages, 13. Lines, 6 on a page.

Begins on fol. 12a of the MS. described under No. 13306.

Contains the 5th Adhyāya.

A treatise on horoscopy by Nṛsiṁhasūri.

Beginning :

. . त्रिविधानि सन्ति भुवने स्त्रीपुन्नपुंसग्रहात्
यत्खेटात् सुतसंभवः पितृवशात् तत्खेटरूपास्सुताः ।
तस्मात्तं पुरुषं भजन्ति सततं तल्लक्षणांस्तद्गुणात्
पारम्पर्यवशाद्भवन्ति जगतो राश्यंशकात् खेचरात् ॥
सल्लक्षणांशात् मनुजो नृपालः विलक्षणांशान्मनुजो दरिद्रः ।
शुभाशुभान् सर्वग्रहान् समीक्ष्य मुखप्रसादात् फललक्षणं वदेत् ॥

End :

शुक्रांशे तमसावृते नटरतः शृङ्गारकाव्यान्वितः
सञ्चारी सरसोक्तिकश्चलगतिर्वेषान्वितो गम्भकः ।
दुर्मार्गो विधवारतिः परसतीचोरः स्वभार्याप्रियो
वेश्याजीवनवृत्तिको नरपशुर्निर्मानिनिर्लज्जकः ॥
एकग्रहस्याप्यथ वा द्वयोर्वा रूपेण युक्तं हि नरस्य रूपम् ।
वदेत् सुधीमानुपदेशगम्यं स एव दैवज्ञगुरुर्महात्मा ॥

Colophon :

इति नृसिंहविरचितायां जातकमञ्जर्यामंशफलं नाम पञ्चमोऽध्यायः ॥

No. 13694. जातकयोगफलग्रन्थः.

JĀTAKAYŌGAPHALAGRANTHAḤ.

Substance, palm-leaf. Size, 14⅝ × 1¼ inches. Pages, 29. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Jñānapradīpikā 16*a*, Āryāsaptati 46*a*, Kālaprakāśikā 62*a*.

Incomplete.

On the predicting of good or evil to a person by knowing the relative position of the planets from his horoscope.

Beginning :

तनुस्थानगताः क्रूरा यात्राकाले भवेद्यदि ।
हानी रोगभयं मृत्युः अर्थैरधिकसंशयः ॥
गुरुशुक्रबुधो यत्र सिद्धिः स्यात्फलदायकः ।
तनुस्थं चन्द्रमा रोगहानिमेव्ये(त्ये)व मानवः ॥

जीवो बुधेन्दू भृगुनन्दनो वा स्थाने तृतीये यदि लग्नकाले ।
सुवस्तुलाभं चतुरङ्गलाभं मासस्य मध्यो हि चतुर्दशाह्ने ॥

End :

शुक्र(फ)लम्—

जारस्त्रीसंङ्गमं चैव शुभ्रवस्त्रं मनोहरम् ।
क्षीरान्नं भुञ्जते यस्तु भार्गवस्य त्रिनाडिकाः ॥

अङ्गारकफलम्—

उष्णादिदेहवैकल्यं देशभ्रमणमेव च ।
नानारिपुतसंवादं भौमे द्वादशनाडिकाः ॥

No. **13695.** जातकयोगार्णवः.

JĀTAKAYŌGĀRṆAVAḤ.

Pages, 41. Lines, 20 on a page.

Begins on fol. 141*a* of the MS. described under No. 13263.

Breaks off in the 5th Adhyāya.

On the good or evil likely to befall to a person from the relative position occupied by the planets as reckoned from the Lagna in his horoscope.

Beginning :

उत्तरे प्रथमे पादे पुष्ये चैव द्विपादगे ।
पूर्वाषाढत्रिपादे च चित्रापूर्वार्धमेव च ॥
जातस्तु पितरं हन्ति जाता चेन्मातरं तथा ।
आश्लेषान्तमखापूर्वज्येष्ठान्तमूलपूर्वकम् ॥
रेवत्यांश्विनयोर्मध्ये गण्डान्तमभिधीयते ।
पूर्वाषाढे च पुष्ये च पितरं मातरं सुतः ॥

* * * *

Colophon :

इति योगार्णवे चतुर्थोऽध्यायः ॥

अथ शङ्खयोगः—

राजारिनाथावन्योन्यं केन्द्रराशिगतौ यदि ।
लग्नाधिपे बलयुते शङ्खयोग इतीरितः ॥

* * * *

योगास्त्रयोदश प्रोक्ताः पूर्वाचार्यैर्महर्षिभिः ।
ते मया कथितस्तत्र वेङ्कटेश्वरशर्मणा ॥

तेषां फलमिदानीं तु प्रोच्यतेऽप्पयसूनुना ।

अथ फलमाह—

नृपतिषु सत्पुतवान् विलासी नित्यस्सदास्रवहुसौख्यः ।

सकलजनानन्दकरो योगे शङ्खे महाजनैः पूज्यः ॥

End :

भेरीयोगे वाद्यघोषैस्समन्तात् मत्तेभानां वाजिनां सङ्घघोषै । ।

सङ्किश्राग्रं स्तूयमानः कृपालुः दीर्घायुस्स्याद्भूमिपालैस्स वन्द्यः ॥

No. 13696. जातकयोगार्णवः.

JĀTAKAYŌGĀRṆAVAḤ.

Pages, 48. Lines, 9 on a page.

Begins on fol. 36*a* of the MS. described under No. 13677.

Contains the first three Adhyāyas, the first Adhyāya being found written again at the end.

Similar to the above, but in a disorderly condition

Colophon :

पञ्चमहाराजयोगस्संपूर्णः ।

इति श्रीविष्णुसंवादे विष्णुयामले राजयोगाध्यायस्समाप्तः ॥

No. 13697. जातकयोगावलिः.

JĀTAKAYŌGĀVALIḤ.

Pages, 28. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13623.

Complete.

A work in horoscopy by Nṛsiṁhasūri, son of Nīlakaṇṭha. The Sarvārthacintāmaṇi and Lakṣmīpati are said to have been consulted by the author.

The work is also called Triṁśadyōgāvali and deals with the following Yōgas :—

दीर्घायुर्योगः.	वाहनयोगः.
मध्यायुर्योगः.	सन्तानयोगः.
अल्पायुर्योगः.	धनयोगः.
भाग्ययोगः.	विद्यायोगः.
विवाहयोगः.	क्षेत्रयोगः.

क्षत्रिययोगः.	दुष्कर्मयोगः.
भूपतियोगः.	गण्डयोगः.
साम्राज्ययोगः.	केमुद्रयोगः.
सार्वभौमयोगः.	अध्वरयोगः.
राजयोगः.	संन्यासयोगः.
सिंहासनयोगः.	कैवल्ययोगः.
जारयोगः.	साहचर्यम्.
जारजयोगः.	सन्तानयोगः.
वाणिज्ययोगः.	

Beginning :

उमासुतं नमस्कृत्य अम्बिका(कां) हंसवाहिनि(नीम्) ।
योगानन्दगुरुं वन्दे परमानन्दरूपिणम् ॥
(. . . . .)
योगावलीं जातकभावहर्ता ॥
सर्वार्थचिन्तामणिसूत्रभावौ लक्ष्मीपतिर्जातकशस्त्याभावौ ।
इत्यादिग्रन्थान्वयसम्मतेन करोमि योगावलिमादरेण ॥
प्राचीनग्रन्थान् बहुधा वदन्ति अगाधभावान् कथमावदन्ति ।
तस्मादहं तद्गतसारमर्थमादाय सङ्क्षिप्य करोमि ग्रन्थम् ॥

* * * *

दीर्घमध्यायुरल्पश्च भाग्योद्वाहं च वाहनम् ।
सन्तानं धनविद्याश्च क्षेत्रं क्षेत्राय भूपतिः ॥
साम्राज्यसार्वभौमश्च राजसिंहासनं तथा ।
जारजारजवाणिज्यं योगसत्कर्मविंशतिः ॥
दुष्कर्म अपमृत्युश्च केमुद्रश्च तथैव च ।
यज्ञसंन्यासकैवल्यं भवेद्योगावलिः क्रमात् ॥
योगाश्चतुर्भवेत् स्त्रीणां सौभाग्यं मतिहीनता ।
साहचर्यं सुतोत्पत्तिः त्रिंशद्योगावलिः क्रमात् ॥

अथ दीर्घायुर्योगः—

लग्नात् पञ्चमसप्तमे च (नव)मे तुङ्गस्थिते वाक्पतिः
स्वद्रेक्काणनवांशभागबलिभिः परमोच्च[भा]गे(हे) सति ।

शुक(:) सौम्यविलग्ननाथसहितः केन्द्रत्रिकोणाश्रितः
जातः पूर्णशतायुपुण्यजननं चक्रेश्वरो भूपतिः ॥

End:

स्मरलग्नाधिपौ चन्द्रे एकांशे रिपुराशिगे ।
अन्तेश्वरेण सन्दृष्टा साहचर्या भवेद्ध्रुवम् ॥
योगे साहचराको(री) जाता सा नारी सुरपूजिता ।
सत्यशीला महाश्रेष्ठा पातिव्रत्यशिरोमणिः ॥

पूर्वोक्तसन्तानयोगः ॥ एतत्रिंशद्योगाः ॥

Colophon:

नीलकण्ठात्मज[स्य] नृसिंहसूरिविरचिते जातकयोगावलिग्रन्थस्समाप्तः ॥

No. **13698.** जातकयोगावलिः.
JĀTAKAYŌGĀVALIḤ.

Pages, 22. Lines, 9 on a page.

Begins on fol. 25*a* of the MS. described under No. 13677.

Complete.

By Nṛsiṁha, son of Nīlakaṇṭha of Śrīvatsagōtra. Same work as the above, but with different readings in the beginning and in the end.

Beginning:

त्रैलोक्यचिन्तामणियोगावलिः—

श्रीमन्नृसिंहेन सरोजजारा(ता) सेयं सरोजालयलालनीया ।
इतीव नित्यं हृदयारविन्दे निवेशितं मां कमला(ल)याव्यात् ॥
श्रीवत्सगोत्रोद्भवग्रन्थकर्ता नृसिंहनामाखिलशास्त्रवेत्ता ।
सिद्धान्तशास्त्रे बहुधा समर्थः योगावलीजातकभावहर्ता ॥
सर्वार्थचिन्तामणिसूत्रभावौ लक्ष्मीपतिर्जातकशस्त्यभावौ ।
इत्यादिग्रन्थान्वयसम्मतेन करोमि योगावलिमादरेण ॥
प्राचीनग्रन्थान् बहुधा भवन्ति अगाधभावान् कथमाचरन्ति ।
तस्मादहं तद्गतसारमर्थमादाय लक्ष्मि (सङ्क्षि)प्य करोमि ग्रन्थम् ॥

भावा भावाधिपो दृष्टिः उच्चनीचबलाबलैः ।
शत्रुमित्रसमक्षेत्रं स्वद्रेक्काणस्य जातकैः (?) ॥
मूलत्रिकोण उच्चांशैः वर्गोत्तमनवांशकैः ।
लग्नं त्रिकोणकेन्द्रश्च चन्द्रकेन्द्रस्तथैव च ॥

* * * *

दीर्घमध्यायुरल्पायुर्भाग्योद्वाहं च वाहनम् ।

* * * *

साहचर्यं सुतोत्पत्तिस्त्रिंशद्योगावलिः क्रमात् ॥

दीर्घायुर्योगः—

लग्नात्पश्चमसप्तमे च नवमे उच्चस्थिते वाक्पतिः
स्वद्रेक्काणनवांशभागबलिभिः परमोच्चगेहे सति ।
शुक्रौ (क्रः) सौम्यविलग्ननाथसहितः केन्द्रत्रिकोणाश्रितः
जातः पूर्णशतायुपुण्यजननं चक्रेश्वरो भूपतिः ॥

End :

अथ साहचर्ययोगः—

* * * *

योगैः साहचरीजातः सा नारी सुरपूजिता ।
सत्यशीला महाश्रेष्ठा पातिव्रत्यशिरोमणिः ॥
पूर्वोक्तसन्तानयोगः ॥ ये (ए)वं त्रिंशद्योगः ॥

Colophon :

नीलकण्ठात्मजनृसिंहविरचिते जातकयोगावलि(:) समाप्ता ॥

No. 13699. जातकयोगावलिः.
JĀTAKAYŌGĀVALIḤ.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 7. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 25*a*. The other works herein are Jñānapradīpikā 1*a*, Jatakālaṅkāra 8*b*, Yuddhakauśalādiviṣaya 15*a*, Svapnādhyāya 19*a*, Daśāntardaśāphala 32*b*, Bṛhajjātaka 42*a*, Pratiprayāṇādiviṣaya 67*a*.

Incomplete.

Same work as the above, but without the first and the third stanzas in the beginning.

No. 13700. जातकलक्षणम्.

JĀTAKALAKṢAṆAM.

Substance, palm-leaf. Size, 18¼ × 1⅛ inches. Pages, 9. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 40*a*. The other works herein are Jyautiṣaviṣaya 1*a*, Naṣṭajātaka (in Telugu) 14*a*, Pañcapakṣiśakuna 15*a* and 23*a*, Kēraḷam 29*a*, Varṣaphaṇicakra 37*a*.

Incomplete.

This treatise on horoscopy lays down the nature of the good or evil supposed to be caused to a person by the influence of certain planets when they come to occupy certain positions

Beginning:

लग्ने मातापितृसुतावर्केन्दुकुजकेतवः ।
रविस्सौरिः कुजः घ्नन्ति द्वितीये मातरं तथा ॥
बुधतृतीये जननीं चतुर्थे राहुरात्मजम् ।
पञ्चमार्केन्दुमन्दारः पितरं सोदरात्मजम् ॥

End:

कर्के वृश्चिकसिंहस्य तिष्ठन्तो राशयस्त्रयः ।
युग्मकुम्भतुलायश्च आशीनां राशयस्त्रयः (?) ॥
वृषकन्याश्च मकरे शयनं च गतास्मृतः ।
गच्छन्तो कलहं घोरं तिष्ठन्तो लाभमुत्तमम् ॥
आसीनां कार्यसिद्धिं च शयनं मृत्युमेव च (?) ।

No. 13701. जातकलग्नफलम्, कर्णाटकटीकासहितम्.

JĀTAKALAGNAPHALAM WITH KANARESE MEANING.

Pages, 10. Lines, 9 on a page.

Begins on fol. 76*a* of the MS. described under No. 13677.

Complete.

On the characteristic qualities, personal appearance, etc., of persons born in the twelve different Lagnas, a Lagna being a period of time astronomically fixed.

Beginning:

लग्नजातकम्—मेषलग्नम्—
मेषलग्ने नरो जातः यदि लग्नबलाधिके ।
लग्ननिर्याणमिच्छन्ति तत्फलं शृणु बालक ॥

ताम्रवद्बलसम्पन्नो रक्ताङ्गो दीर्घनासिकः ।
कृपालुः कुटिलो दीनः कामी कार्यविचक्षणः ॥

End :

बहुभार्यो बहुपुत्रः द्वौ सुताष्टसहोदराः ।
जीवेद्वर्षाणि सर्वाणि सङ्कुचयाशीतिवत्सरान् ॥
आषाढे कृष्णपक्षे च नवम्यां रोहिणी यथा ।
सोमवारेऽपराह्णे च सङ्गृहे बन्धुसङ्कुले ॥
तत्काले ज्ञातमरणं योगमार्गे तनुं त्यजेत् ॥

Colophon :

इति जातकलग्नफलं सम्पूर्णम् ॥

No. **13702.** जातकविषयः.

JĀTAKAVIṢAYAḤ.

Pages, 12. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 6470, wherein this work has been mentioned as Jyautiṣa in the list of other works given therein.

Incomplete.

Similar to the work described under No. 13697 ante.

Beginning :

* * * *

अमृतं नामयोगोऽयं यातुरायुःप्रदस्सदा ।
उच्चांशगे लग्नसंस्थे बुधो(धे)वाथ गुरौ सिते ॥
शुभ . . . . शुभदस्सदा ।
स्वोच्चस्वोच्चांशगे सौम्ये लग्नस्थे वा भृगोस्सुते ॥

* * * *

लग्नस्य केन्द्रगे चन्द्रे लग्नस्थे देवपूजिते ।
महाशङ्खाह्वयो योगः शत्रुसङ्घं निहन्त्यलम् ॥

End :

दशमस्थितेऽर्कपुत्रे सुतस्य जन्मन्यङ्गनायास्स्युः ।
लभ्या वरस्य नारीषु समस्थितोऽन्यथा वामा ॥

No. 13703. जातकविषयः.
JĀTAKAVIṢAYAḤ.

Pages, 54. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13634.
Incomplete.
Similar to the above.

Beginning:

एकतुङ्गे भवेद्योगी द्वितुङ्गे च महाधनी ।
त्रितुङ्गे च भवेद्राजा तुङ्गहीनो दरिद्रता ॥
केन्द्रे शतायुर्भृगुजो गुरुर्वा दिष्टं च चन्द्रे गृहजं विनश्यति
केन्द्रत्रिकोणाष्टमगानु पापं शुक्रे गुरौ केन्द्रगते शतायुः ॥
अरिष्टस्थो यदा चन्द्रः सूर्येणैवावलोककृत् ।
आशेषविलयं यान्ति गात्रे पातकं यथा ॥

End:

मातृस्थानाधिपयुते वित्तेशेनोपसंयुते ।
तत्काले धनहानिः स्यान्मातुल(स्य) भवेन्मृतिः ॥
मातृजायास्थिते मन्दे भौमेन सहिते यदि ।
मातृकलत्ररोगं वा भविष्यति न संशयः ॥

No. 13704. जातकविषयः.
JĀTAKAVIṢAYAḤ.

Substance, palm-leaf. Size, 13⅜ × 1¼ inches. Pages, 28. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Śivadīkṣā 15*a*.
Incomplete.
Similar to the above.

Beginning:

लग्नार्के च(त्रवि)क्रीयाल्पसतनुः क्रोधी प्रचण्डोन्मदो
मानी लोचनरुक् सुकर्कशतनुः शूरः क्षमी निर्घृणः ।
स्फोटाक्षः शशिभे क्रियानतिमिरः सिंहो निशांध्यमां (सिंहेऽनिशं द्रव्यवान्)
दारिद्र्योपहतो विनष्टनयनो जातस्तुलायां भवेत् ॥ १ ॥
द्विपदचतुष्पदभागे मुखरोगी नष्टसौख्यविभवश्च ।
नृपचोरमुषितसारः कुटुम्बगे स्याद्रवौ पुरुषः ॥

End :

शुक्रक्षेत्रगते भौमे कुजक्षेत्रगते भृगौ ।
वेश्या वा जारिणी वापि तस्य भार्या न संशयः ॥

No. 13705. जातकविषयः.

JĀTĀKAVIṢAYAḤ.

Substance, palm-leaf. Size, 13⅝ × 1⅝ inches. Pages, 15. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 8*a*. The other works herein are Lampāka 1*a*, Svaraprasna 7*a*, Bhāvanighaṇṭu 15*b*, Dvādaśabhāvaphala 16*a*, Ṣaṭpañcāśaddhōrāvivṛti 24*a*, Praśnakṛṣṇīya 30*a*.

Incomplete.

Similar to the above.

Beginning :

वसिष्ठोऽहं प्रवक्ष्यामि जातकालशुभावहम् ।
ततः शीर्षोदयं विद्यादायुष्कालवशाद्युतः ॥
पृष्ठे तु नासिकामूले तस्माल्लग्नं परीक्षयेत् ।
लग्नमेव प्रशंसन्ति जातके शास्त्रचोदितः ॥
राश्यां गते सद्भिरपीक्ष्यमाणे चन्द्रत्रिकोणोपगतैश्च पापैः ।
पुण्यैः प्रयान्त्येव शिशुर्वियोगः मध्ये तु पापैस्तु हिमांशुलग्ने ॥

* * * *

अष्टमस्थितग्रहफलम्—

इनशशिकुजसौम्या देवमन्त्रिभृगूणा—
मिनसुतसहितानामष्टमस्था प्रसूता ।
ज्वलनसलिलखङ्गव्याधिमृत्युर्दरिद्रं
पितृमरणसमेतं भास्करादिक्रमेण ॥
ताताम्बिकासोदरमातुलाश्च मातामहा मातृसमश्च नूनम् ।
सूर्यादिखेटप्रमु(ब)रैः प्रसिद्धाः ते पञ्चमस्थाः खलु तान्निहन्ति ॥

End :

रजस्वलाचक्रम्—

कृत्तिकादीनि नक्षत्रमभिजिच्छ्रवणं तथा ।
दिग्विदिग्विन्यसेत्पूर्वे चत्वारि त्रीणि यं(च) क्रमात् ॥

सम्पद्बन्ध्या सुसौभाग्यं भिक्षाशित्वं बहुप्रजा ।
सौभाग्यमर्थलाभं च मृत्युं च तदनुक्रमात् ॥

No. 13706. जातकविषयः.
JĀTAKAVIṢAYAḤ.

Pages, 30. **Lines,** 6 on a page.

Begins on fol. 59*a* of the MS. described under No. 13606.

Incomplete.

On the nature of the influence supposed to be due to the relative position occupied by the planets in a given horoscope. The Telugu meaning for a portion is found at the end.

Beginning :

चरस्थिरद्वन्द्व इत्यायुर्निर्णयविषये अतिदीर्घाल्पत्वादिभेदपरिज्ञानोपाया लिख्यन्ते । चरे जन्मलग्ने होरालग्ने चरे दीर्घायुः । तत्र होराप्रथमभागे अतिदीर्घो चरमभागे तु दीर्घप्रारम्भमात्रं मध्यम अनुपातः । अथ चरे जन्मलग्ने स्थिरे मध्यमम् । तत्रापि प्रथमभागे पूर्णमन्त्यभागे न्यूनम् । द्वन्द्वमल्पविषये च द्रष्टव्यः । अथ प्रकारान्तरेणायुर्निर्णयप्रकारः ।

धर्मे मोक्षे चिरायुष्यं धर्मकामे च मध्यमम् ।
धर्मे धने च स्वल्पायुः धर्मधर्मे गतायुषः ॥

* * * *

तत्र लग्नदशा आयुर्विषये द्विविधा । एका भार्याविषया अपरा भुक्तिविषया । तथाहि । मेषभोज्यवृषभादयः । एवं वृषभलग्नस्य भुक्तौ मिथुनादयः । भोज्ये मेषादयः । फलविषये भोज्यविषये भुक्तिविषयेऽप्यस्तीति केषांचित्पक्षः । अस्माकं भोज्यविषयैवेत्युपदेशः ।

End :

नृणां मृतिर्विशेषेण चरपर्यायतो भवेत् ।
तद्बलाच्चरपर्याये नयेत्तु शशिलेययोः ॥
जाया नारी नीचभेषु पापदृष्टियुतैर्हि वा ।
यस्य तस्मिन् मृतिं विद्यात्संवादान्निश्चयं वदेत् ॥

No. 13707. जातकविषयः.
JĀTAKAVIṢAYAḤ.

Pages, 9. **Lines,** 10 on a page.

Begins on fol. 49*a* of the MS. described under No. 18601, wherein this work has been omitted to be mentioned in the list of other works given therein.

Incomplete.

Same work as the above.

No. 13708. जातकविषयः.

JĀTAKAVIṢAYAḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 22. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 12*a*. The other work herein is Jaiminisūtra 1*a*.

Complete.

Same work as the above, but with a different end.

End :

इति राशिदशाः ।

परिधाय दशाभेदैः परिधाय . . . नयेत् ।

तत्रापि(च)दशाश्चन्द्रैस्तृतीयवर्षे विनिश्चयेत् ॥

रविकुजशनिराहुः मरणं बलिनः क्रमात् ।

विशेषेण हित्वा गृह्णीयात् बलिनं सुधीः ॥

Colophon :

इति पर्यायदशाः ॥

No. 13709. जातकविषयः.

JĀTAKAVIṢAYAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 98*a* of the MS. described under No. 5966, wherein this work has been mentioned as Jīvakādhyāya 91*a* in the list of other works given therein.

Incomplete.

Similar to the above. Deals with the six ways in which the influences of the planets are affected by certain astrological conditions.

Beginning :

जीवको मारकश्चैव बोधकः प्रेषकस्तथा ।

दावको हारकश्चैव वेदितव्या(:) षडेव ते ॥

एते सर्वेषु भावेषु चिन्तनीयाः प्रयत्नतः ।

तत्तद्दशायां तत्कार्यं सूक्ष्मं ज्ञात्वा फलं वदेत् ॥

जीवकाध्यायः—

स्वर्क्षे वा शुग्मराशौ वा मित्र(भे) वापि जीवकः ।
केन्द्रस्थः शुभसन्दृष्टः लग्ननाथशुभेक्षितः ॥
लग्नाधिपः केन्द्रसंस्थः जीवकः शुभवीक्षितः ।
शुभर्क्षे शोभनैर्युक्तमष्टमस्थोऽपि जीवकः ॥

* * * *

Colophon:

इति जीवकाध्यायः ॥

* * * *

इति मारकाध्यायो द्वितीयः ।

End:

पोषकाध्यायः—

भार्याधीशः शोभनश्चेत् सुखेशो वा तथाविधः ।
परिवृत्य स्वभागस्थः पोषको भवतो हितौ ॥

* * * *

उच्चांशपूर्णचन्द्रौ लग्नस्थौ वा लाभगौ स्थानगौ वा ।
धर्मस्थाने सूर्यपुत्रे बलाढ्ये जातो योगी स्याद्युगान्तं स जीवेत् ॥
एकांशभाजौ गुरुमन्दजीवौ धर्मस्थितौ वा यदि कर्मसंस्थौ ।
अर्कोदये सौम्यनिरीक्ष्यमाणौ मानी भवेदत्र भवश्चिरायुः ॥

No. 13710. जातकशिरोमणिः. JĀTAKAŚIRŌMAṆIḤ.

Pages, 27. Lines, 8 on a page.

Begins on fol. 6*b* of the MS. described under No. 13684.

Contains the 12th Adhyāya complete and the 13th incomplete.

Explains with reference to a horoscope the significance of each of the 12 houses representing the 12 Rāśis or signs of the zodiac calculated from the Lagna. Also relates how the future of a person is influenced in different ways according to the relative position of the planets.

Beginning:

लग्नं समुदयं होराशल्यं देहस्तनुस्तथा ।
द्वितीयं द्रविणं सार्थं कुटुम्बं वित्तवाचकम् ॥
तृतीयं विक्रमं भ्रातृ . . . सहजं तथा ।
चतुर्थं जलपातालं बन्धुं (म)हिमदीधितिः ॥

मातृवाहनवेश्मे च चतुर्थस्थानतो विधिः(दुः) ।
पञ्चमं सुतपुत्रश्च तनयं प्रतिभाषितम् ॥

*   *   *   *

पञ्चमभावपुत्रभावफलम्—

पुत्रस्थाने बुधक्षेत्रे मन्दक्षेत्रे तथा पुनः ।
मन्दमन्द(मान्दि)युते दृष्टे तथा दत्तादयस्स्मृताः ॥

*   *   *   *

Colophon:

इति जातकशिरोमणिसंहितायां द्वादशोऽध्यायः ॥

लग्नाधिपो वा जीवो वा शुक्रो वा यदि केन्द्रके ।
तस्य पुत्रस्य दीर्घायुर्धनवान् राजवल्लभः ॥

End:

गुरुसौम्येक्षिते विद्या कर्मस्थानस्थिते कुजे ।
त्रयीविद्यादिपाण्डित्यब्रह्मविद्याबलाढ्यकैः ॥
पापमध्यगते चन्द्रे मातृभे पापसंयुते ।
माता दुर्बलरोगा स्यात् पुत्रीमूलेन जीवनम् ॥

No. **13711**. जातकसंहिता.

JĀTAKASAMHITĀ.

Substance, palm-leaf. Size, 12 × 1⅛ inches. Pages, 168. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

A treatise on horoscopy dealing with the following subjects:—

संवत्सरफल.	तिथिफल.
अयनफल.	वारफल.
ऋतुफल.	नक्षत्रफल.
मासफल.	योगकरणफल.
पक्षफल.	लग्नांशफल.
कालफल.	होराफल.
स्वरफल.	द्रेक्काणफल.
राशिफल.	नक्षत्रजातकदशाफलादि.

Beginning :

उद्योगी बलवान् त्यागी समामाज्यो(न्यो)भवेश्वरः ।
स्वदारनिरतः श्रीमान् प्रभवे जामि(जनि)तो नरः ॥
श्रीमान् मनोहराङ्गश्च विशालाक्षो नृपप्रियः ।
कामी सर्वकलाभिज्ञो विभवाब्दे समुद्भवः ॥

* * * *

Colophon :

इति जातकसंहितायां संवत्सरफलं समाप्तम् ॥

अयनफलम्—

देवब्राह्मणभक्तश्च गुरुभक्तिश्च नैष्ठिकः ।
ग्लानिर्मनोहराङ्गश्च उत्तरायणजो नरः ॥

End :

रविक्षेत्रे त्वनावृष्टिश्चन्द्रक्षेत्रे जला च (ग)मः ।
कुजक्षेत्रे महायुद्धं बुध(धे)स्याद्वायुपीडितम् ॥
आरोग्यं तु गुरुक्षेत्रे शुक्रक्षेत्रे जलागमः ।
शनिक्षेत्रे महाहानिर्ग्रहाणां योगजं फलम् ॥
कुजज्ञजीवरविजाः शुक्रस्याग्रेसरा यदि ।
युद्धातिवायुदुर्भिक्षं जलनाशकरं यथा ॥

No. 13712. जातकसारसङ्ग्रहः.
JĀTAKASĀRASAṄGRAHAḤ

Substance, palm-leaf. Size, 11 × 1¼ inches. Pages, 141. Lines, 7 on a page Character, Telugu. Condition, injured. Appearance, old.

Complete.

A treatise dealing with predictions relating to the duration and certain other incidents of human life and based on the Jaiminisūtras described below : by Rāghavabhaṭṭa, son of Goṭṭimukkala Rāmacandradīkṣita. The date of the work is given as Svabhānu, but the statement of the Śaka is not clear.

Beginning :

नत्वा शम्भुसुमं गुरुं गणपतिं सूर्योच्चचन्द्रं कुजं
सौम्यं वाक्पतिभार्गवौ शनितमःकेतूंश्चिरं पण्डितान् ।

कुर्वे जैमिनिसूत्रसंमतमहं सङ्ग्रहावतां प्रीतये
नानाजातकसारसङ्ग्रहमिमं कारुण्यतोऽस्मद्गुरोः ॥

पुरा खलु कारुणिकेन जैमिनिना आयुर्दशाफलदशाप्रतिपादकानि सूत्राणि कृतानि । तत्सूत्रप्रतिपादितदशामध्ये अस्मद्बुद्ध्यारूढाः काश्चन आयुर्दशाः फलदशाश्च मया लिख्यन्ते । तत्रादौ होरादशा—अस्यां दशायां सामान्यतः आयुर्ज्ञानाय लिख्यते । लग्नेशाष्टमेशयोः चराद्यराशिवृत्तित्वे स्थिरोभयवृत्तित्वे वा पूर्णायुः । चरस्थिरवृत्तित्वे उभयद्वयवृत्तित्वे मध्यम् । चरोभयवृत्तित्वे स्थिरस्थिरवृत्तित्वे वा अल्पम् । एवं लग्नचन्द्राभ्यां लग्नहोरालग्नाभ्यामायुरानीय संवादवशादायुर्निर्णेयम् ।

*　　　*　　　*　　　*

नन्वायुर्योगकारणेषु बहुषु सत्सु कस्य प्राबल्यं वक्तव्यमित्यत आह—संवादात् प्रामाण्यम् । संवाद एकवाक्यता द्वयोस्त्रयाणां वा तस्मात् प्रामाण्यं प्रमाणता संवादाभावे कथमित्यत आह.

End :

तत्र केवलकेतुदृष्टे अवधूतो वेति.

इत्युपासनायोगः ।

अन्यत्सर्वं जैमुनीयसूत्राण्यालोच्य सूक्ष्मदृष्ट्यावधातव्यमिति दिक् ॥

श्रीगोट्टिमुक्क(ल)कुलाम्बुधिपूर्णचन्द्रश्रीरामचन्द्रमखिनः कृतवांस्तनूजः ।

सान्दुत्के(?) द्विरसचन्द्रयुते स्वभानौ श्रीजातसारपदपूर्वकसङ्ग्रहं हि ॥

Colophon :

इति श्रीगोट्टिमुक्काल रामचन्द्रदीक्षितस्य पुत्रेण राघवभट्टेण कृतो जातकसारसङ्ग्रहे योगपरिच्छेदस्तृतीयः ॥

No. **13713**. जातकसारसङ्ग्रहः.

JĀTAKASĀRASAṄGRAHAḤ.

Pages, 63. Lines, 9 on a page.

Begins on fol. 4a of the MS. described under No. 13618.

Complete.

Same work as the above.

No. 13714. जातकसारसङ्ग्रहः.
JĀTAKASĀRASAṄGRAHAḤ.

Pages, 55. Lines, 8 on a page.

Begins on fol. 41*a* of the MS. described under No. 13673.

Incomplete.

Same work as the above.

The scribe gives the date: Monday, the 9th day of the dark fortnight of the Jyēṣṭha month in the year Pramōdūta.

No. 13715. जातकसारसङ्ग्रहः.
JĀTAKASĀRASAṄGRAHAḤ.

Pages, 28. Lines, 18 on a page.

Begins on fol. 24*b* of the MS. described under No. 13570.

Incomplete.

Same work as the above.

No. 13716. जातकसारसङ्ग्रहः.
JĀTAKASĀRASAṄGRAHAḤ.

Pages, 68. Lines, 7 on a page.

Begins on fol. 49*a* of the MS. described under No. 13688.

Contains up to Drēkkāṇadaśā.

Same work as the above.

No. 13717. जातकसारसङ्ग्रहः.
JĀTAKASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 17½ × 1⅝ inches. Pages, 12. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 18*a*. The other works herein are Jaiminisūtravyākhyā (Jyōtiḥpradīpikā) 1*a*, Jaiminisūtra 12*a*.

Contains the Hōradaśā.

Same work as the above.

No. 13718. जातकसारावलिः.
JĀTAKASĀRĀVALIḤ.

Pages, 26. Lines, 7 on a page.

Begins on fol. 135*b* of the MS. described under No. 6470, wherein this work has been stated to begin on fol. 137*a* in the list of other works given therein.

Complete in five Adhyāyas.

A work in Jyautiṣa by Kalyāṇavarman explaining the important Yōgas in accordance with the treatment of Yavana and others. But this is different from the one described under No. 2898 of the India Office Library Catalogue.

Beginning:

यवनाद्यैर्विस्तरतः कथिता योगास्तु बहुविशेषेण ।
तानागमतो वक्ष्ये प्रधानभूतं समस्तजन्तूनाम् ॥
लग्नात्केन्द्रगते भौमे योगो मङ्गलकादिकः ।
मङ्गलाख्ये नरो जातो नित्यश्रीर्म(र्नित्यम)ङ्गलः ॥
कुलीरे चन्द्रगुर्वर्के मालायोगस्स उच्यते ।
मालायोगे जातो धनवान् कीर्त्यान्वितोऽतिसम्पन्नः ॥
* * * *
व्ययसंस्थे भानुयुतस्तमश्च शनिभौमजामित्रे ।
जातो नरभूताद्यैः कृत्रिमयन्त्राभ्यासमहासमर्थः ॥
इत्यादियोगा यवनप्रदिष्टा मयादिभिः पूर्वपुराकृतानि ।
युक्तं समस्तग्रहयोगजातैर्विचारिणीं बुद्धियुतो मनुष्यः ॥

Colophon:

इति श्रीमत्कण्या(ल्या)णवर्मविरचितायां जातकसारावल्यां ग्रहयुक्तविशेषयोगो नाम प्रथमोऽध्यायः ॥

End:

या नारी तु स्तनावर्ता गुल्फावर्ता प्रदक्षिणे ।
दुश्शीला भ्रमणं तत्र परपुरुषरता भवेत् ॥
भ्रूयुग्मे च भ्रुवोर्मध्ये पादावर्ता भवन्ति या ।
विधवा जायते तस्य भ्रमणं च यथेप्सितम् ॥
भुजे मध्ये यथावर्ता हंसावर्ता भवे . . . ॥

Colophon:

. . . . संपृच्छे पञ्चमोऽध्यायः ॥

No. 13719. जातकाभरणम्.

JĀTAKĀBHARAṆAM.

Substance, paper. Size, 11 × 4¼ inches. Pages, 14. Lines, 10 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

This work seems to be the same as that described under No. 3075 of the India Office Library Catalogue by Daivajña Duṇḍirāja who quotes Yavanācārya.

Contains the following subjects : —

१. नष्टजातकाध्यायः, २. चन्द्रनिर्याणम्.

Beginning :

आधानकाले(लो)ऽप्यथ जन्मकालो न ज्ञायते यस्य नरस्य नूनम् ।
प्रसूतिकालं प्रवदन्ति तस्य नष्टाभिधानादपि जातकश्च ॥
तज्जातकं येन शुभाशुभानि जातस्य जन्तोर्जननोत्थकालात् ।
तस्मिन्प्रनष्टे सति जन्मकालो येनोच्यते तेन हि नष्टकं तत् ॥

* * *

Colophon :

इति श्रीदैवज्ञढुण्ढिराजविरचिते जातकाभरणे नष्टजातकाध्यायः ।

End :

आश्विनस्यासिते पक्षे द्वितीयायां गुरोर्दिने ।
कृत्तिकानामनक्षत्रे सायं मृत्युर्न संशयः ॥
इतीरितं तु निर्याणं यवनाचार्यसम्मतम् ।
मीनस्थे यामिनीनाथे भवेदत्र न संशयः ॥
इति मीनराशिस्थितिचन्द्रनिर्याणम् ॥

Colophon :

इति श्रीदैवज्ञढुण्ढिराजविरचिते जातकाभरणे नष्टजन्मपत्रिकानिर्याणाध्यायस्सम्पूर्णम्(:) ॥

The scribe adds—

संवत् १८२७ फाल्गुनमासे कृष्णपक्षे तिथौ २ शनिवासरे लिखितं मिश्रकरामेण स्वार्थं परोपकारार्थं च ॥

No. 13720. जातकाभरणम्.

JĀTAKĀBHARAṆAM.

Substance, palm-leaf. Size, 9⅜ × 1¼ inches. Pages, 23. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old

Incomplete.

Similar to the above. By Rāmacandra who wrote it between 1747 and 1807 A.D.

Contains the following Adhyāyas :—

१. सिद्धान्ताध्यायः.
२. भावाध्यायः.
३. सृष्टिसाधनाध्यायः.
४. बलाध्यायः.

Beginning :

कृत्वा शिवपदाम्भोजं रामचन्द्रः प्रवच्म्यहम् ।
श्रीपतिग्रन्थसदृशं जातकाभरणं स्फुटम् ॥

कल्यब्द(ा)नयनम्—

अशीतिनिहता षष्टिर्गजवेदसमन्विता ।
प्रभवाद्यब्दसंयुक्ता भवेयुः कलिवत्सराः ॥

अथ सृष्टब्दानयनम्—

खचतुष्काष्टनागार्घे(क्ष)पवनाङ्कहिमांशुभिः । १९५९८८०००० ।
कल्यादिवत्सरा युक्ता भवेयुस्सृष्टिवत्सराः ॥

*   *   *   *

ग्रहाणामुच्चादीनि—

सूर्यस्य मेषो दशभिस्तु भागैरुच्चस्त्रिभिस्स्याद्वृषभो हिमांशोः ।
मृगोऽष्टविंशैर्धरणीसुतस्य बुधस्य कन्या पवनेन्दुभिश्च ॥
शरैः कुलीरः सुरराजसूरेः शुक्रस्य मीनोऽद्रिविलोचनैश्च ।
शनैस्तुला व्योमकरैस्तु नीचाः स्वस्वोच्चराश्यन्तगृहा भवेयुः ॥

*   *   *   *

Colophon :

इति वक्ष्यमाणगणितोपयोग्यसिद्धान्ताध्यायः ।

End :

इति बलाध्यायः ॥

Colophon :

मुख्यं पञ्चविधं ज्ञेयं भेदमुल्लेखनं बुधैः ।
रश्मिसंसृष्टं कूटमपसव्यं यथाक्रमम् ॥

*   *   *   *

उदक्स्थो दीप्तिमान् स्थूलो जयी याम्ये जितो बली ।
उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो बली ॥

No. 13721. जातकालङ्कारः.
JĀTAKĀLAṄKĀRAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 40*b* of the MS. described under No. 13606.

Complete.

Similar to the above.

Beginning:

देहाधिपस्सपापः षष्ठाष्टव्ययेषु स्थितश्चेत् न देहसौख्यम् । षष्ठाष्ट(ष्ठाष्टम)पः तत्र स्थितश्चेत् तदेव फलं, देहसौख्यं नास्तीत्यर्थः । लग्नस्थोऽपि लग्नपापास्तथा व्याधिमान् । बलहीनोऽपि केन्द्रत्रिकोणेषु स्थितश्चेश्चा(दा)धिर्न भवति । किन्तु कोपवान् ।

End:

धनभाग्यलाभाधिपः केन्द्रत्रिकोणेषु स्थितः तत्तत्स्थानराशिपाः केन्द्रत्रिकोणेषु स्थिताश्चेत्तदा बहुधनवान् भवति ॥

Colophon:

जातकालङ्कारः समाप्तः ॥

No. 13722. जातकालङ्कारः.
JĀTAKĀLAṄKĀRAḤ.

Pages, 31. Lines, 16 on a page.

Begins on fol. 31*a* of the MS. described under No. 13601.

Complete.

Same work as that described under R. No. 1288(*c*) of the Triennial Catalogue of MSS., Vol. II, Part I-A, wherein see for the beginning.

End:

मन्दस्य लग्ने मन्दे पापपीडितदेहः दरिद्रः दीर्घरोगः । उच्चे स्थिते परबलद्रव्याधिकारी तिलमाषकोद्रवाशी कृष्णधान्यवृद्धिमान् । द्वितीये मन्दे पितृव्यभावः दारद्वयं पापयुते पापम् । तृतीये मन्दे भ्रातृभा(व)हानिः । चतुर्थे मन्दे पापयुते मातृविपत् मातृद्वयम् । पञ्चमे मन्दे पुत्रहानिः दारिद्यम् उत्सुकश्च । षष्ठे मन्दे रविवत्फलम् । सप्तमे मन्दे व्यभिचारी कलत्रद्वयम् । अष्टमे मन्दे दीर्घायुः । नवमे मन्दे जीर्णोद्धारणं गोपुरादिकर्ता । दशमे मन्दे गङ्गास्नानम् । अन्यत्र रविवत् फलम् ॥

Colophon:

इति जातकालङ्कारस्समाप्तः ॥

No. 13723. जातकालङ्कारः.
JĀTAKĀLAṄKĀRAḤ.

Pages, 64. Lines, 19 on a page.

Begins on fol. 37*a* of the MS. described under No. 5764, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete. Contains a few Tamil passages at the end.

Same work as that described above, but the end is different.

End:

उक्तयोगेषु गुलिकयोगे उत्तमफलनिश्चयः । द्वितीयराहुस्थितः पापदृष्टश्चेत् केन्द्रवादिकृत् शीतान्नभुक् भवति । लग्नपे बलवति धनस्थे निधनप्राप्तिः । ये पापग्रहपश्चनाडीप्राप्तिः शुक्रचन्द्रान्यतरः स्यात् तृतीयस्थितौ सुखभुक्तिः ॥

Colophon:

जातकालङ्कारः समाप्तः ॥

No. 13724. जातकालङ्कारः.
JĀTAKĀLAṄKĀRAḤ.

Pages, 20. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 13648.

Incomplete.

Similar to the work described under R. No. 1288(*c*) of the Triennial Catalogue of MSS., Vol. II, Part I-A.

Beginning:

अथ जातकालङ्कारमार्गे वक्ष्ये पण्डितपामरसाधारणम् । अथ लग्नाधिपद्वादशभावेषु केन्द्रत्रिकोणेषु तद्भावफलं वक्ष्ये लग्नाधिपः केन्द्रत्रिकोणेषु स्थितश्चेत् देहभावफलमुत्तमम् । षष्ठाष्टमव्ययेषु स्थितश्चेत् देहाधिपेन देहेन जातकस्य देहवर्णं वक्तव्यम् । शुभाशुभे फलं विचारणीयम् ।

End:

अनागतमदैवज्ञकालज्ञानं ज्ञात्वा जातकालङ्कारोक्तं भूतभविष्यद्वर्तमानं करतलामलकं यथा तथा प्रकाशितं कालज्ञानदैवज्ञचिन्तामणाविति ।

Colophon:

द्वादशभावस्समाप्तः ॥

रविशुक्रौ रक्तवर्णौ श्वेतौ शशिबुधौ तथा ।
गुरुभौमौ पाटलौ च कृष्णवर्णश्शनैश्चरः ॥
राहुः कर्बुरवर्णश्च केतुस्स्याच्चित्रवर्णकः ॥

No. 13725. जैमिनिसूत्रम्.
JAIMINISŪTRAM.

Pages, 25. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13688.

Contains up to the end of the second Pāda of the fourth Adhyāya.

Same work as that described under R. No. 371(*g*) of the Triennial Catalogue of MSS., Vol. I, Part I-B, wherein see for the beginning. This is a treatise in the form of Sūtras dealing with horoscopy.

End:

द्वारभाग्ये च । वर्णपुराश्रयकोणेषु शुक्रे च । कोणयोश्शुभेषु । मित्रप्रागपव . . . .

Colophon:

इत्युपदेशसूत्रे चतुर्थाध्याये बलविचारो नाम द्वितीयः पादः ॥
बुधशुक्रयोर्युग्मे स्त्रीजननम् ॥

No. 13726. जैमिनिसूत्रम्.
JAIMINISŪTRAM.

Pages, 6. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 13613.

Contains the Adhyāyas one and two.

Same work as the above.

No. 13727. जैमिनिसूत्रम्.
JAIMINISŪTRAM.

Pages, 12. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 13717.

Contains from the beginning of the first Pāda of the third Adhyāya to the end.

Same work as the above.

No. 13728. जैमिनिसूत्रम्.
JAIMINISŪTRAM.

Pages, 11. Lines, 7 on a page.

Begins on fol. 105*a* of the MS. described under No. 13619.
Contains Adhyāyas one and two complete.
Same work as the above.

No. 13729. जैमिनिसूत्रम्.
JAIMINISŪTRAM.

Pages, 46. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13708.
Incomplete.
Same work as the above.

No. 13730. जैमिनिसूत्रम्.
JAIMINISŪTRAM.

Pages, 13. Lines, 7 on a page.

Begins on fol. 69*a* of the MS. described under No. 13651.
Contains the Adhyāyas 1 to 8.
Similar to the above. The name given above is what is found in the margin at the beginning of the work.

Beginning:

अथ सर्वेषां भावानां द्वादशभावफलं वक्ष्यते ॥

लग्नाधिपनीचराशिकुटुम्बशत्रुगतत्वात् तस्य देहसौख्यं परिमितम् । जलराशिगतत्वात् स्थौल्यम् । शुष्कराशिगतत्वाच्छुष्कम् । एषु राशिषु शुभग्रहसम्बन्धश्चेत् देहसौख्यमस्ति । पूर्वोक्तदोषं नास्ति ।

End:

व्ययहीनोऽत्र लोभी च निर्घृणः पिशुनाग्रणीः ॥
लग्नाष्टमेनभाग्येशकेन्द्रस्वोच्चगता यदि ।
यदि जातोऽतिदीर्घायुः संपन्नविभवात्सुखी ॥
को वक्ता तारतम्यस्य तमेकं वेधसं विना ।
द्वि(वि)द्वच्चित्तानुसारेण भावबोधं मया कृतम् ॥

Colophon:

अष्टमोऽध्यायः ॥

दिनेन गतनाडी तु चतुष्कं लग्नसंयुतम् ।
सप्तार्वेशं हरेद्भागं जन्मनक्षत्रनिर्णयम् ॥

No. 13731. जैनिमिसूत्रम् , कर्णाटकटीकासाहितम्.
